(अपौरुषेयत्वात्-न नित्यत्वम्-अंकुरादिवत्) वेदानमपौरुषेयत्वात् खल्वपि नास्ति नित्यत्वमङ्कुरादिवत्, यथाङ्कुरशाखापत्रपुष्पफलानि खल्वपौरुषेयाणि सन्त्यपि न नित्यानि तान्यपि वेदवदीश्वरकृतानि कार्याणि। तथापि यथा ह्यङ्कुरादीनि प्रवाहेण नित्यानि प्रतिकल्पे प्रवर्तनात् तथैव वेदानां प्रावाहिकनित्यत्वं त्वस्त्येव प्रतिकल्पे प्रवर्तनान्, एवं ज्ञानरूपो वेदस्तु नित्य एव ।।४८।।

पुनः -

तेषामपि तद्योगे दृष्टबाधादिप्रसक्तेः ।।४९।।

(तेषाम्-अपि तद्योगे अंकुरादीनामपि पुरुषकर्तृत्वयोगे स्वीकारे (दृष्टबाधादिप्रसक्तेः) लोकदृष्टबाधोऽदृष्टकल्पनं च प्रसज्यते, लोकदृष्टस्य प्रत्यक्षस्य बाधस्तथाऽयुक्तानुमानकल्पनं भवेत् ।।४९।।

) और वेद नित्य नहीं हैं (नित्यत्व का खंडन कर रहे हैं)। इस आकांक्षा पर कहते हैं-

नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ।।४८।।

सूत्रार्थ= मनुष्य कृत न होने पर भी अंकुरादि के समान वेद भी नित्य नहीं हैं, वेद का ज्ञान नित्य है, वेद तो प्रवाह से नित्य हैं अंकुरादि के समान प्रत्येक सृष्टि में उत्पन्न होने से।

[(अपौरुषेयत्वात्-न नित्यत्वम्-अंकुरादिवत्) वेदानमपौरुषेयत्वात् खल्वपि नास्ति नित्यत्वमङ्कुरादिवत्] वेद भले ही अपौरुषेय हैं (मनुष्य कृत नहीं हैं) फिर भी वो नित्य नहीं हैं ये बात ठीक है, अंकुरादि के समान, **[यथाङ्कुरशाखापत्रपुष्पफलानि खल्वपौरुषेयाणि सन्त्यपि न नित्यानि तान्यपि वेदवदीश्वरकृतानि कार्याणि]** जैसे अंकुर हैं, शाखा है, पत्र, पुष्प, फल, तना है ये सब भी तो अपौरुषेय हैं। ईश्वर के द्वारा बनाए होने पर भी वह नित्य नहीं हैं, ये सब वेद के समान ईश्वर द्वारा किया गया कार्य है। **[तथापि यथा ह्यङ्कुरादीनि प्रवाहेण नित्यानि प्रतिकल्पे प्रवर्तनात् तथैव वेदानां प्रावाहिकनित्यत्वं त्वस्त्येव प्रतिकल्पे प्रवर्तनान्]** जैसे अंकुर आदि प्रवाह से नित्य हैं प्रत्येक सृष्टि में अंकुर से वृक्ष शाखा होते जाते हैं फिर अगला बीज बनता है फिर बीज से अंकुर अंकुर से वृक्ष ये क्रम चलता रहता है और जब प्रलय हो जाती है तब सारा समाप्त हो जाता है, फिर अगली सृष्टि में अंकुर शाखा पत्र पुष्प आदि उत्पन्न होने लग जाते हैं। प्रवाह रूप से वह भी नित्य हैं। इसी प्रकार से वेदों का प्रवाहिक नित्यत्व तो है ही, प्रत्येक कल्प में वेदों की प्रवृति चलती रहती है, **[एवं ज्ञानरूपो वेदस्तु नित्य एव]** इस प्रकार से ज्ञान के रूप में वेद तो नित्य ही है परंतु वेद पुस्तक अनित्य है।।४८।।

पुनः -

तेषामपि तद्योगे दृष्टबाधादिप्रसक्तेः ।।४९।।

सूत्रार्थ= उन अंकुरादि का भी पुरुष कर्तृत्व में योग मानने पर अंकुरादि का कर्ता पुरुष को मानने पर लौकिक प्रत्यक्ष से विरुद्ध कथन होगा और प्रत्यक्ष अदृश्य की व्यर्थ कल्पना करनी पड़ेगी।

वस्तुतः -

यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयम् ।।५०।।

(यस्मिन्-अदृष्टे-अपि) यस्मिन् ह्यदृष्टेऽपि कर्तृत्वयोगे (कृतबुद्धिः-उपजायते) पुरुषकृतत्वनिश्चयः सञ्जायते (तत् पौरुषेयम्) तत्खलु पुरुषकृतं पुरुषकार्यं न च तथाऽङ्कुरादौ जायते न हि वेदेष्वपि ।।५०।।

वेदानां तु -

निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् ।।५१।।

(निजशक्त्यभिव्यक्तेः) वेदानां तु स्वाभाविक्या शक्त्याऽभि व्यक्तिमत्त्वात्-अपौरुषेयशक्त्या।

[(तेषाम्-अपि) तद्योगे अंकुरादीनामपि पुरुषकर्तृत्वयोगे स्वीकारे (दृष्टबाधादिप्रसक्तेः) लोकदृष्टबाधोऽदृष्टकल्पनं च प्रसज्यते] अंकुरादि को भी मनुष्य कृत मान लें ऐसा स्वीकार करने में जो लोक दृष्ट है बाध होता है उसका खण्डन होता है और जो कभी देखी नहीं ऐसी कल्पना करनी पड़ती है, **[लोकदृष्टस्य प्रत्यक्षस्य बाधस्तथाऽयुक्तानुमानकल्पनं भवेत्]** मनुष्य वृक्ष शाखा आदि बनाता हो ऐसा मानने पर लौकिक प्रत्यक्ष का विरोध होता है अदृष्ट बात कि कल्पना करनी पड़ेगी ।।४९।।

वस्तुतः -

यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयम् ।।५०।।

सूत्रार्थ= जिस परोक्ष कार्य में कोई प्रामाणिक बुद्धि उत्पन्न होती है, उसका कोई कर्ता है यह अनुमान से सिद्ध होती है तो उस वस्तु को पौरुषेय=मनुष्यकृत कहते हैं।

[(यस्मिन्-अदृष्टे-अपि) यस्मिन् ह्यदृष्टेऽपि कर्तृत्वयोगे (कृतबुद्धिः-उपजायते) पुरुषकृतत्वनिश्चयः सञ्जायते (तत् पौरुषेयम्) तत्खलु पुरुषकृतं पुरुषकार्यं न च तथाऽङ्कुरादौ जायते न हि वेदेष्वपि] जिसको बनाते हुए न देखने पर भी उसकी रचना देखकर ऐसा लगता है की ये मनुष्य कृत है , वो पुरुष का कृत कार्य है परंतु अंकुर आदि में ऐसी अनुभूति नहीं होती और न ही वेदों के संदर्भ में ऐसा लगता है की ये मनुष्य कृत हों ।।५०।।

वेदानां तु -

निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् ।।५१।।

सूत्रार्थ= अपनी शक्ति= सामर्थ्य को अभिव्यक्त करने में स्वतः समर्थ होने से वेद स्वतः प्रामाणिक हैं तथा ईश्वर की निज शक्ति से प्रकट होने से भी वेद स्वतः प्रमाण हैं।

जगदीश्वरस्य निजशक्त्याऽभिव्यक्तिमत्त्वात् (स्वतः प्रामाण्यम्) स्वतः प्रामाण्यमस्ति न हि परतः प्रामाण्यं पौरुषेयाणामिव ।।५१।।

अथ पञ्चचत्वारिंशं सूत्रमारभ्यैकपञ्चाशत्तमसूत्रपर्यन्तसूत्रक्रमस्यान्यो व्याख्या- मार्गः -

ननु कथमुच्यते वैदिकशब्दानामर्थे स्वाभाविकी शक्तिर्यावता -

न नित्यत्वं वेदानां कार्यत्वश्रुतेः ।।४५।।

(वेदानां नित्यत्वं न) वेदानां नित्यत्वं नास्ति, न हि वेदा नित्याः सन्ति (कार्यत्वश्रुतेः) तेषां कार्यत्वश्रुतिदर्शनात् ''तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत।।'' (ऋ० १०.९०.९) ''त्रयो वेदा अजायन्त'' (शत० ११.५.८.३) ।।४५।।

~~समाधत्ते -~~

[(निजशक्त्यभिव्यक्तेः) वेदानां तु स्वाभाविक्या शक्त्याऽभि व्यक्तिमत्त्वात्-अपौरुषेयशक्त्या जगदीश्वरस्य निजशक्त्याऽभिव्यक्तिमत्त्वात् (स्वतः प्रामाण्यम्) स्वतः प्रामाण्यमस्ति न हि परतः प्रामाण्यं पौरुषेयाणामिव] वेदों की जो अभिव्यक्ति है वह ईश्वर की स्वाभाविक शक्ति से हुई है, अपौरुषेय शक्ति से ईश्वर की निज शक्ति से प्रकट होने के कारण वेद स्वत: प्रमाण हैं उसे प्रामाणिक करने के लिए अन्य किसी प्रमाण की आवश्यकता नहीं है। जैसे पुरुष कृत ग्रन्थों को प्रामाणिक करने के लिए अन्य ग्रन्थों के प्रमाणों की आवश्यकता होती है, ईश्वर की बनाई हुए वेद को किसी अन्य प्रमाण की आवश्यकता नहीं सर्वज्ञ परमात्मा की वाणी होने से ।।५१।।

४५ वे सूत्र से आरंभ करके और ५१ वें सूत्र तक इन सभी सूत्रों की दूसरी व्याख्या करेंगे-

वैदिक शब्दों के अर्थ में स्वाभाविक शक्ति होते हुए भी वेदों का नित्यत्व क्यों नहीं है? इस बात को अलग प्रकार से नए ढंग से प्रस्तुत करते हैं-

न नित्यत्वं वेदानां कार्यत्वश्रुतेः ।।४५।।

सूत्रार्थ= वेदों का नित्यत्व नहीं हैं कार्यपन सुनाई देने से।

[(वेदानां नित्यत्वं न) वेदानां नित्यत्वं नास्ति, न हि वेदा नित्याः सन्ति (कार्यत्वश्रुतेः) तेषां कार्यत्वश्रुतिदर्शनात्] वेदों का नित्यत्व नहीं है वेद नित्य नहीं हैं क्योंकि वेदों की उत्पत्ति श्रुति में दिखाई जाने से **[''तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।'' (ऋ० १०.९०.९) ''त्रयो वेदा अजायन्त'' (शत० ११.५.८.३)]** ।।४५।।

समाधत्ते - समाधान करते हैं-

न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् ।।४६।।

सुत्रार्थः-वेद पुरूष कृत=मनुष्य कृत नहीं है वेद बनाने वाले पुरूष के विद्यमान न होने से।

न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् ।।४६।।

(तत्कर्तुः पुरुषस्य-अभावात् पौरुषेयत्वं न) वेदानां कार्यत्वमुच्यते पुनः कार्यत्वमाश्रित्य हि तेषामनित्यत्वं साध्यते परन्तु कार्यस्य कर्त्रा भाव्यं किन्तु तत्कर्तुस्तेषां वेदानां कर्तुः पुरुषस्याभावात् पौरुषेयत्वं पुरुषकृतत्वं कार्यत्वं नास्ति पुनः कार्यत्वमवलम्ब्यनित्यत्वं वेदानां न सिध्यति ।।४६।।

कुतो हि वेदानां कर्तुः पुरुषस्याभावः । अत्रोच्यते -

न मुक्तामुक्तयोरयोग्यत्वात् ।।४७।।

(मुक्तामुक्तयोः-न) वेदानां कर्ता मुक्तामुक्तयोः कश्चनापि न भवितुमर्हति (अयोग्यत्वात्) तयोर्योग्यत्वाभावात्। मुक्तस्यैश्वर्यं जगद्व्यापारवर्जं भवति ''जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च'' (वेदा० ४.४.१७) तथा प्रयोजनाभावाच्च, अमुक्तस्याल्पज्ञत्वात्। या हि खलु श्रुतिर्दर्शिता वेदानां कार्यत्वं साधयितुं तत्र तु वेदानां जायमानत्वमुक्तं न हि कार्यत्वम्, जायमानत्वं प्रादुर्भावः ''जनी प्रादुर्भावे''

[(तत्कर्तुः पुरुषस्य-अभावात् पौरुषेयत्वं न) वेदानां कार्यत्वमुच्यते पुनः कार्यत्वमाश्रित्य हि तेषामनित्यत्वं साध्यते] सिद्धांती कहता है वेद कार्य रूप हैं और कार्य रूप होने से उनका अनित्यत्व सिद्ध करते हैं (क्योंकि जो वस्तु उत्पन्न होती भी वह अनित्य होती है- आप इस प्रकार से अपनी बात को प्रस्तुत कर रहे हैं) **[परन्तु कार्यस्य कर्त्रा भाव्यं किन्तु तत्कर्तुस्तेषां वेदानां कर्तुः पुरुषस्याभावात् पौरुषेयत्वं पुरुषकृतत्वं कार्यत्वं नास्ति]** परंतु किसी भी कार्य का कर्ता होना चाहिए (ये नियम है) कर्ता के बिना कोई कार्य होता नहीं। किन्तु वेदों को बनाने वाला कोई पुरुष तो है ही नहीं, इसलिए वेदों के कर्ता पुरुष का अभाव होने से वेदों का पुरुष कृतत्व नहीं है **[पुनः कार्यत्वमवलम्ब्यनित्यत्वं वेदानां न सिध्यति]** फिर जब वेदों का कार्यपन ही सिद्ध नहीं हो रहा उस आधार पर अनित्यता कैसे सिद्ध कर सकते हैं, इसलिए वेदों की अनित्यता भी सिद्ध नहीं होती।।४६।।

वेदों के बनाने वाले पुरुष का अभाव कैसे है? इस पर कहते हैं-

न मुक्तामुक्तयोरयोग्यत्वात् ।।४७।।

सूत्रार्थः-मुक्त जीवात्मा और बद्ध जीवात्मा दोनों ही वेदों के बनाने में समर्थ नहीं

[(मुक्तामुक्तयोः-न) वेदानां कर्ता मुक्तामुक्तयोः कश्चनापि न भवितुमर्हति (अयोग्यत्वात्) तयोर्योग्यत्वाभावात्] वेदों का कर्ता मुक्त और बद्ध दोनों में से कोई भी नहीं हो सकता, दोनों ही अयोग्य अल्पज्ञ हैं। **[मुक्तस्यैश्वर्यं जगद्व्यापारवर्जं भवति]** मुक्त की जो शक्ति=योग्यता है वह संसार में हस्तक्षेप की नहीं है **[''जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च''(वेदा०४.४.१७)]** मुक्तात्मा के लिए जगत का व्यापार वर्जित है, प्रकरण से सृष्टि रचना आदि कार्य में कोई योगदान नहीं है **[तथा प्रयोजनाभावाच्च, अमुक्तस्याल्पज्ञत्वात्]** तथा उनका कोई प्रयोजन भी नहीं है, ''अल्पज्ञ वाला हेतु दोनों पर लगेगा-मुक्त और बद्ध पर''। **[या हि खलु श्रुतिर्दर्शिता वेदानां कार्यत्वं साधयितुं तत्र तु वेदानां जायमानत्वमुक्तं न हि**

(दिवादि०) प्रादुर्भूता वेदाः। तेन न कार्यत्वं कार्यत्वाभावान्नित्यत्वं वेदानां नात्र क्षतिः ।।४७।।

पुनः पूर्वक्षत्वेनोच्यते -

नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ।।४८।।

(अपौरुषेयत्वात्-नित्यत्वम् न-अंकुरादिवत्) वेदानमपौरुषेयत्वं भवतु जायमानत्वं तु तत्र श्रुतौ प्रतिपाद्यते तेनापौरुषेयत्वाद्धेतोरेव तेषां नित्यत्वं न भवति जायमानत्वधर्मवत्त्वादङ्कुरादिवत्, यथाङ्कुरशाखापत्रपुष्पफलानि सन्त्यपौरुषेयाणि परन्तु जायमानत्वान्न नित्यानि, तथैव वेदा अपि जायमानत्वादनित्याः, अन्यथा तान्यपि नित्यानि स्युः ।।४८।।

कार्यत्वम्] अब सिद्धांती उत्तर दे रहा है पूर्वपक्षी के आक्षेप का-आपने जो श्रुति दिखलाई थी वेदों के कार्यपन को सिद्ध करने की (चारों वेद उत्पन्न हुए) वहाँ तो वेद प्रकट हुए ऐसा कहा है, उत्पन्न हुए ऐसा नहीं कहा, **[जायमानत्वं प्रादुर्भावः ''जनी प्रादुर्भावे'' (दिवादि०) प्रादुर्भूता वेदाः]** जायमान का अर्थ है प्रादुर्भाव होना ''जनी प्रादुर्भाव'' वेद प्रकट हुए । **[तेन न कार्यत्वं कार्यत्वाभावान्नित्यत्वं वेदानां नात्र क्षतिः]** इस कारण से जब वेद उत्पन्न हुए ही नहीं प्रकट हुए इस कारण से वेदों का कार्यत्व सिद्ध नहीं हुआ परंतु कार्यत्व सिद्ध न होने से वेदों का नित्यत्व सिद्ध हुआ।।४७।।

फिर पूर्वपक्ष की तरफ से कहते हैं-

नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ।।४८।।

सूत्रार्थः- मनुष्यकृत न होने पर भी अंकुरादि के समान वेद भी नित्य नहीं है, किन्तु वेद का ज्ञान नित्य है।वेद तो प्रवाह से नित्य है अंकुरादि के समान प्रत्येक सृष्टि में उत्पन्न होने से ।

[(अपौरुषेयत्वात्-नित्यत्वम् न-अंकुरादिवत्) वेदानमपौरुषेयत्वं भवतु जायमानत्वं तु तत्र श्रुतौ प्रतिपाद्यते तेनापौरुषेयत्वाद्धेतोरेव तेषां नित्यत्वं न भवति जायमानत्वधर्मवत्त्वादङ्कुरादिवत्] वेदों का अपौरुषेयत्व हो जावे, वेद प्रकट हुए थे ये श्रुति में बताया गया था इस कारण (अपौरुषेय होने) से उनका नित्यत्व नहीं है। पूर्वपक्षी का हेतु-क्योंकि वेद ईश्वर के द्वारा बनाए गए इस कारण से वेद अनित्य है, वे प्रकट हुए हैं अंकुर आदि के समान, **[यथाङ्कुरशाखापत्रपुष्पफलानि सन्त्यपौरुषेयाणि परन्तु जायमानत्वान्न नित्यानि]** जैसे अंकुर शाखा फूल पत्ते आदि ये भी ईश्वर कृत हैं=अपौरुषेय हैं परंतु क्योंकि ईश्वर से प्रकट हुए हैं इसलिए ये नित्य नहीं है भले ही ईश्वर से बने हों, **[तथैव वेदा अपि जायमानत्वादनित्याः]** इसी प्रकार से वेद भी ईश्वर से प्रकट हुए हैं इसलिए अनित्य हैं, **[अन्यथा तान्यपि नित्यानि स्युः]** यदि आप ऐसा नहीं मानते तो अंकुर आदि को भी नित्य मानो।।४८।।

दृष्टान्तसिद्ध्या समाधत्ते -

तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः ।।४९।।

(तेषाम् तद्योगे-अपि) अंकुरादीनामपौरुषेयत्वयोगेऽपि न नित्यत्वम् 'न नित्यत्वम्' पूर्वसूत्रतोऽनुवर्तते। कुतोऽङ् कुरादीनां न नित्यत्वम् । उच्यते (दृष्टबाधादिप्रसक्तिः) अङ् कुरशाखापत्रपुष्पफलानि क्रमशो नष्टानि दृश्यन्ते-इति। दृष्टस्य बाधनं प्रसज्यतेऽथ च पुनः पुनर्बीजात् प्ररोक्ष्यन्तीत्यनुमानहानिः प्रसज्यते। तस्मादङ्कुरादिदृष्टान्तासिद्ध्या वेदानां नित्यत्वनिराकरणं न युज्यते, तेषां तु नित्यत्वमेवापौरुषेयत्वात् ।।४९।।

वेदानां कुतो न पौरुषेयत्वं कुतस्तत्कर्तुः पुरुषस्याभावः? किमदृष्टत्वाद् यत्तेषां कर्ता केनापि न दृष्ट इति मत्वा। अत्रोच्यते -

---

दृष्टान्तसिद्ध्या समाधत्ते - आपका दृष्टांत उचित नहीं, अब सिद्धांती समाधान करता है-

तेषामपि तद्योगे दृष्टबाधादिप्रसक्तेः ।।४९।।

सूत्रार्थः- उन अंकुरादि का भी पुरूष कर्तृत्व में योग मानने पर अंकुरादि का कर्त्ता पुरूष को मानने पर लौकिक प्रत्यक्ष से विरूद्ध कथन होगा और प्रत्यक्ष विरूद्ध कल्पना करनी पड़ेगी।

[**(तेषाम् तद्योगे-अपि) अंकुरादीनामपौरुषेयत्वयोगेऽपि न नित्यत्वम् 'न नित्यत्वम्' पूर्वसूत्रतोऽनुवर्तते**] "न नित्यत्वम्" पूर्व सूत्र से ला रहे हैं- अंकुर आदि के अपौरुषेय होने पर भी वो नित्य नहीं है। [**कुतोऽङ्कुरादीनां न नित्यत्वम्**] अंकुरादि का नित्यत्व क्यों नहीं है?। **उच्यते** उत्तर देते हैं- [**(दृष्टबाधादिप्रसक्तिः) अङ् कुरशाखापत्रपुष्पफलानि क्रमशो नष्टानि दृश्यन्ते-इति**] अंकुर शाखा पत्र पुष्प फल ये तो क्रमशः नष्ट होते जाते हैं। [**दृष्टस्य बाधनं प्रसज्यतेऽथ च पुनः पुनर्बीजात् प्ररोक्ष्यन्तीत्यनुमानहानिः प्रसज्यते**] यदि हम अंकुर शाखा आदि को नित्य माने तो प्रत्यक्ष से विरोध आएगा, इसलिए इनको नित्य नहीं मान सकते, अंकुर शाखा आदि को नित्य मानने पर जो अनुमान करते हैं, पुनः पुनः बीज डालने वाले कार्य से जो उत्पत्ति का अनुमान करते हैं उसकी भी हानि होगी। [**तस्मादङ्कुरादिदृष्टान्तासिद्ध्या वेदानां नित्यत्वनिराकरणं न युज्यते**] इसलिए अंकुरादि का जो दृष्टांत आपने दिया वह ठीक सिद्ध नहीं हुआ, ऐसे वेदों की नित्यता का खंडन नहीं कर सकते, [**तेषां तु नित्यत्वमेवापौरुषेयत्वात्**] वेदों का ईश्वर कृत होने से नित्यत्व तो है ही।।४९।।

वेदों का पुरुष कृर्तत्व क्यों नहीं है? क्यों ऐसा मानते हैं की वेदों का बनाने वाला कोई पुरुष नहीं है? क्या अदृष्ट होने से? क्या ये सोच करके कि वेद का कर्ता किसी मनुष्य ने देखा ही नहीं? इसका उत्तर देते हैं-

यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयम् ।।५०।।

(यस्मिन्-अदृष्टे-अपि कृतबुद्धिः-उपजायते) यस्मिन् खल्वदृष्टेऽपि वस्तुनि कृतबुद्धिः पुरुषकृतत्वबुद्धिर्निश्चिता भवति (तत् पौरुषेयम्) तत् पुरुषकृतं विज्ञेयम्, न तथा वेदाः। ते तु प्रादुर्भूताः सन्तो ज्ञानदृष्ट्या नित्याः सन्ति ।।५०।।

तस्मात् -

निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् ।।५१।।

(निजशक्त्यभिव्यक्तेः) वेदानां पुरुषकृतत्वाभावे मनुष्यकृतत्वाभावे निजशक्त्या शाश्वतया स्वाभाविक्या शक्त्याऽभिव्यक्तत्वात् प्रादुर्भूतत्वात् । उक्तं यथा ''अस्य महतो भूतस्य निःश्वसितमृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः'' (शत० १४.५.४.१०) ''स्वाभाविकी ज्ञानबलक्रिया च'' (श्वेता०

यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयम् ।।५०।।

सूत्रार्थः- जिस परोक्ष कार्य में कोई प्रमाणिक बुद्धि उत्पन्न होती है, उसको कोई कर्त्ता है यह अनुमान से सिद्ध होता है ता उस वस्तु को पौरूषेय=मनुष्यकृत कहते हैं।

[(यस्मिन्-अदृष्टे-अपि कृतबुद्धिः-उपजायते) यस्मिन् खल्वदृष्टेऽपि वस्तुनि कृतबुद्धिः पुरुषकृतत्वबुद्धिर्निश्चिता भवति (तत् पौरुषेयम्) तत् पुरुषकृतं विज्ञेयम्, न तथा वेदाः] किसी वस्तु को बनाते हुए न देखने पर भी ऐसा विचार आए कि यह मनुष्य कृत है परंतु वेद इस प्रकार के नहीं हैं जिसे देख कर ये लगता हो कि यह मनुष्य कृत है। **[ते तु प्रादुर्भूताः सन्तो ज्ञानदृष्ट्या नित्याः सन्ति]** बल्कि वे चार वेद ईश्वर से प्रकट हुए ज्ञान कि दृष्टि से नित्य हैं ।।५०।।

तस्मात् -

निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम् ।।५१।।

सूत्रार्थः-अपनी शक्ति सामर्थ्य को अभिव्यक्त करने में स्वतः समर्थ होने से वेद स्वतः प्रमाणिक हैं तथा ईश्वर की निज शक्ति से प्रकट होने से भी वेद स्वतः प्रमाण हैं।

[(निजशक्त्यभिव्यक्तेः) वेदानां पुरुषकृतत्वाभावे मनुष्यकृतत्वाभावे निजशक्त्या शाश्वतया स्वाभाविक्या शक्त्याऽभिव्यक्तत्वात् प्रादुर्भूतत्वात्] वेदों के पुरुष कृत न होने पर मनुष्य कृत न होने पर भी परमात्मा की अपनी शक्ति से जो स्वाभाविक शाश्वत है उस शक्ति से अभिव्यक्त होने के कारण प्रकट हुए हैं। **[उक्तं यथा ''अस्य महतो भूतस्य निःश्वसितमृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः''(शत० १४.५.४.१०)]** जैसा कि कहा शास्त्र में ''कि इस महान परमात्मा से चार वेद ऐसे प्रकट हुए जैसे श्वास निकलता है (जैसे श्वास लेना छोड़ना स्वाभाविक कार्य है छोटा सा कार्य है ऐसे ही ईश्वर को वेद प्रकट करना,

६.८) (स्वतः प्रामाण्यम्) स्वतः प्रमाणत्वमस्ति ।।५१।।

भवतु वेदानां निजशक्त्याऽभिव्यक्तिरभिव्यक्तत्वं प्रादुर्भावो दर्शनं तथा हि "न, अभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ" (सांख्य० १.१२०) अनेन सूत्रेण जगतोऽपि सांख्यमतेऽभिव्यक्तिरभिव्यक्त्वं प्रकटीभावः प्रकाशो वा प्रत्यपादि । श्रुतौ यज्जायमानत्वं वेदानां जगतश्च निर्दिष्टम् "तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।" (ऋ० १०.९०.९) "द्यावाभूमी जनयन् देव एकः" (यजु० १७.१९) जनीधातोः प्रादुर्भावार्थत्वात्। तदित्थं वेदानां जगतश्चाभिव्यक्तत्वं प्रादुर्भावो दर्शनं वा किमसद्रूपाद् भवति ? कथं वा भवतीत्याकांक्षायामुच्यते -

नासतः ख्यानं नृश्रृंगवत् ।।५२।।

(असतः ख्यानं न नृश्रृंगवत्) वेदानां जगतश्च ख्यानमभिव्यक्तत्वं प्रादुर्भावो दर्शनं वा

स्वाभाविक आसान काम है) ["**स्वाभाविकी ज्ञानबलक्रिया च**"(**श्वेता० ६.८**)] ज्ञान, बल और क्रिया तीनों स्वाभाविक हैं [**(स्वतः प्रामाण्यम्) स्वतः प्रमाणत्वमस्ति**] इन कारणों से वेदों का स्वतः प्रमाणत्व है, उनको सिद्ध करने के लिए किसी और प्रमाण कीह आवश्यकता नहीं है ।।५१।।

जैसे वेदों की अभिव्यक्ति परमात्मा की निज शक्ति से हुई है प्रादुर्भाव दर्शन हुआ है, उसी प्रकार से सांख्य में एक सूत्र आया है कि "अभिव्यक्ति के कारण से ही व्यवहार और अव्यवहार होते हैं" [**अनेन सूत्रेण जगतोऽपि सांख्यमतेऽभिव्यक्तिरभिव्यक्त्वं प्रकटीभावः प्रकाशो वा प्रत्यपादि**] इस सूत्र से ये विचारधारा भी सामने आती है, सांख्यदर्शन से कि जगत का भी प्रकटी भाव हुआ है, सांख्य की दृष्टि से, जैसे वेद ईश्वर से प्रकट हुए ऐसे जगत भी प्रकट हुआ है, इसकी भी अभिव्यक्ति हुई है अथवा प्रकाश हुआ है ऐसा संख्यादर्शन में प्रतिपादन किया है। [**श्रुतौ यज्जायमानत्वं वेदानां जगतश्च निर्दिष्टम्**] श्रुति में वेदों का और जगत का जो जायमानत्व दिखाया है ["**तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत।।**" (**ऋ० १०.९०.९**) "**द्यावाभूमी जनयन् देव एकः**" (**यजु० १७.१९**) **जनीधातोः प्रादुर्भावार्थत्वात्**] क्योंकि जनी धातु का प्रादुर्भाव अर्थ है। [**तदित्थं वेदानां जगतश्चाभिव्यक्तत्वं प्रादुर्भावो दर्शनं वा किमसद्रूपाद् भवति? कथं वा भवतीत्याकांक्षायामुच्यते -**] इस प्रकार से वेदों का और जगत का जो प्रादुर्भाव हुआ अभिव्यक्ति हुई दर्शन हुआ वह क्या अभाव रूप से हुआ अथवा कैसे हुआ? इसका उत्तर देते हैं-

नासतः ख्यानं नृश्रृंगवत् ।।५२।।

सूत्रार्थ= असत=अभाव का प्रादुर्भाव नहीं होता है, जैसे मनुष्य का सींग नहीं होता।

[**(असतः ख्यानं न नृश्रृंगवत्) वेदानां जगतश्च ख्यानमभिव्यक्तत्वं प्रादुर्भावो दर्शनं वा नासद्रूपाद् भवति, न ह्यसतो वस्तुनः ख्यानं दर्शनं भवति नृशृङ्गमिव**] वेदों का और जगत का जो

नासद्रूपाद् भवति, न ह्यसतो वस्तुनः ख्यानं दर्शनं भवति नृशृंगमिव। तस्माज्जगच्छुक्तौ रजतवन्नास्ति, शुक्तौ रजतख्यानमपि नान्यत्रासतो रजतस्य ।।५२।।

किं पुनः सतां वेदानां सतो जगतो वा ख्यानाम् । अत्रोच्यते -

न सतो बाधदर्शनात् ।।५३।।

(सतः-न) सतां वेदानां सतो जगतोऽपि न तथारूपेणैवाभिव्यक्तत्वं प्रादुर्भावः ख्यानं वा । कुतः (बाधदर्शनात्) बाधोऽत्राभावः । सतो वस्तुनां बाधोऽभावो दृश्यते, नहि सर्वकाले वेदाः सन्तो न सर्वकाले जगत् सत्, प्रलयेऽभावात् । तस्मात् सतो विज्ञानात्मनो जगतोऽनादितो वर्तमानस्य वा जगतः ख्यानमित्यपि न युक्तं नहि सर्वकाले सतो वस्तुनः ख्यानमभिव्यक्तत्वं युक्तमभिव्यक्तस्य भावाभावधर्मित्वात् ।।५३।।

ख्यान है, अभिव्यक्ति है, प्रादुर्भाव, प्रकट, दर्शन होना ये अभावरूप स्थिति से नहीं है, क्योंकि असद रूप वस्तु से (अभावात्मक वस्तु से) किसी भी वस्तु की अभिव्यक्ति, दर्शन नहीं होता। जैसे मनुष्य का सींग। **तस्माज्जगच्छुक्तौ रजतवन्नास्ति** इसलिए जगत सीपी में चाँदी के तुल्य भ्रांति में नहीं है, [**शुक्तौ रजतख्यानमपि नान्यत्रासतो रजतस्य**] सीपी में चाँदी का दिखना भी अभावात्मक चाँदी से कोई भिन्न नहीं है (ये पंक्ति का अर्थ सूत्र से मेल नहीं खाता)।।५२।।

क्या ऐसा मानले के वेद पहले से सत्तात्मक रूप से तैयार थे और जगत जैसा का तैसा बना रखा था? ''ये दूसरा पक्ष है'' इस प्रश्न का उत्तर देते हैं-

न सतो बाधदर्शनात् ।।५३।।

सूत्रार्थ = उत्पन्न होने वाले विद्यमान सभी पदार्थ सदा प्रकट नहीं रहते हैं। उनका अभाव भी देखे जाने से।

[**(सतः-न) सतां वेदानां सतो जगतोऽपि न तथारूपेणैवाभिव्यक्तत्वं प्रादुर्भावः ख्यानं**] वा वेद पहले से बना हुआ एवं जगत भी बना हुआ था इस प्रकार से इस जगत का प्रादुर्भाव नहीं है। ये पक्ष भी ठीक नहीं है। [**कुतः क्यों (बाधदर्शनात्) बाधोऽत्राभावः**] (क्योंकि एक समय के पश्चात् जगत का विनाश हो जाएगा जगत बना बनाया नहीं रहेगा) एक समय बाद इसका बाध हो जाता है। [**सतो वस्तुनां बाधोऽभावो दृश्यते**] जो सत्तात्मक वस्तुएं हैं इनका अभाव देखा जाता है, [**नहि सर्वकाले वेदाः सन्तो न सर्वकाले जगत् सत्, प्रलयेऽभावात्**] न तो सब कालों में वेद विद्यमान रहते हैं (मनुष्यों के पास) और न ही प्रत्येक काल में जगत रहने वाला है, दोनों का प्रलय में अभाव हो जाएगा। [**तस्मात् सतो विज्ञानात्मनो जगतोऽनादितो वर्तमानस्य वा जगतः ख्यानमित्यपि न युक्तं**] इसलिए विज्ञानात्मक वेद भी सदा से ही था और जगत भी अनादि काल से वर्तमान है ये जैसे के तैसा प्रकट हो गया ऐसा मानना ठीक नहीं है [**नहि सर्वकाले सतो**

तर्हि यद्वस्तुनोऽभिव्यक्तस्वरूपं नासद्रूपतो न सद्रूपतः किन्तु तद्विलक्षणमनिवर्चनीयं स्यात् । अत्रोच्यते -

नानिर्वचनीयस्य तदभावात् ।।५४।।

(अनिर्वचनीयस्य न) अनिर्वचनीयस्य सदसद्भ्यां भिन्नस्याभिव्यक्तत्वं प्रादुर्भावः ख्यानं दर्शनं स्यादिति न (तदभावात्) तस्य सदसद्भ्यां भिन्नस्य वस्तुनोऽविद्यमानत्वादसम्भवात्। तथाभूतस्य वस्तुनो भावः स्यात् तर्हि निर्वचनीयं तत् स्यात्। तस्माज्जगतोऽभिव्यक्तत्वं दर्शनं न सदसद्भिन्नहेतुकं भवति ।।५४।।

वस्तुनः ख्यानमभिव्यक्तत्वं युक्तमभिव्यक्तस्य भावाभावधर्मित्वात्] जो वस्तु प्रकट हुई है उस वस्तु का सदा ही प्रकटता बनी रहे ऐसा प्रमाणों के अनुकूल नहीं है जो वस्तु अभिव्यक्त होती है उसके दो धर्म होते हैं एक भाव भी और अभाव भी ।।५३।।

तीसरा पक्ष- फिर ये मान लिया जाए जिस वस्तु की अभिव्यक्ति हुई है, न तो वह अभाव से प्रकट हुआ और न ही बना बनाया था, किन्तु इनसे तीसरे प्रकार का मान लेते हैं, वह है अनिर्वचनीय (जिसकी व्याख्या नहीं कर सकते) ऐसे जगत कि अभिव्यक्ति हुई? इस पर कहते हैं-

नानिर्वचनीयस्य तदभावात् ।।५४।।

सूत्रार्थ= अनिर्वचनीय (न कहने योग्य वस्तु का कथन) प्रादुर्भाव नहीं होता, उसका सर्वथा अभाव होने से।

[(अनिर्वचनीयस्य न) अनिर्वचनीयस्य सदसद्भ्यां भिन्नस्याभिव्यक्तत्वं प्रादुर्भावः ख्यानं दर्शनं स्यादिति] न वो सद भी नहीं था असद भी नहीं था इन दो से भिन्न तीसरे प्रकार का था, ये बात भी नहीं हो सकती। **[(तदभावात्) तस्य सदसद्भ्यां भिन्नस्य वस्तुनोऽविद्यमानत्वादसम्भवात्]** दो में से कोई तीसरा प्रकार होता ही नहीं यह असंभव है वो सद भी न हो और असद भी न हो ऐसा कैसे हो सकता है?। **[तथाभूतस्य वस्तुनो भावः स्यात् तर्हि निर्वचनीयं तत् स्यात्]** यदि कोई ऐसी वस्तु होवे फिर तो उसकी सत्ता होगी जब सत्ता होगी फिर उसकी व्याख्या की जा सकती है। **[तस्माज्जगतोऽभिव्यक्तत्वं दर्शनं न सदसद्भिन्नहेतुकं भवति]** इसलिए जगत कि अभिव्यक्ति या दर्शन सत्तात्मक और असत्तात्मक इन दोनों से अलग तीसरे प्रकार के पदार्थ से नहीं हो सकता।।५४।।

चौथा पक्ष- फिर भी है तो जगत लेकिन मिथ्या ही मान लो-

अस्तु तर्हि जगतो दर्शनमन्यथैव मिथ्येत्यर्थः -

नान्यथाख्यातिः स्ववचो व्याघातात् ।।५५।।

(अन्यथाख्यातिः-न) अन्यथाख्यानं मिथ्याभिव्यक्तत्वं दर्शनमपि न सम्भवति दृश्यमानस्य जगतः। कुतः (स्ववचोव्याघातात्) स्वकथनविरोधात् - उच्यते ह्यस्तीदं जगत् पुनरन्यथा मिथ्याऽपि कथ्यते - अस्तीति च नास्तीति च वचनविरोधः, न हि सतोऽन्यथात्वं मिथ्यात्वं भवति। तथाऽन्यदन्यात्मनाऽवभासते जगद् यथा रजतात्मना शुक्तिरवभासते तद्वज्जगदन्यात्मनाऽवभासते तद्वचनविरुद्धं यदा जगतोऽसत्त्वं तदाऽसत्त्वं सत्त्वात्मनाऽवभासेतेति नावसरः सर्वस्यान्यथात्वान्मिथ्यात्वात् पुनः किं केन रूपेणावभासेत। तस्मान्न जगच्छुक्तौ रजतवदन्यथाऽभिव्यक्तं ख्यातं वा ।।५५।।

वस्तुतस्तु -

सदसत्ख्यातिर्बाधाबाधात् ।।५६।।

नान्यथाख्यातिः स्ववचो व्याघातात् ।।५५।।

सूत्रार्थ= दृश्यमान जगत का जो ज्ञान हो रहा है, वह मिथ्या नहीं है, अपने ही वचन का विरोध होने से।

[**(अन्यथाख्यातिः-न) अन्यथाख्यानं मिथ्याभिव्यक्तत्वं दर्शनमपि न सम्भवति दृश्यमानस्य जगतः**] दिखने वाले इस जगत का मिथ्या दर्शन संभव नहीं है (जगत हो नहीं और हमको जगत दिख रहा हो ऐसा संभव नहीं) चौथा पक्ष भी ठीक नहीं। [**कुतः (स्ववचोव्याघातात्) स्वकथनविरोधात्**] क्योंकि ऐसा बोलने में अपने ही कथन से विरोध आता है - [**उच्यते ह्यस्तीदं जगत् पुनरन्यथा मिथ्याऽपि कथ्यते**] कहते हैं जगत है फिर कहते हैं मिथ्या है - [**अस्तीति च नास्तीति च वचनविरोधः**] ''जगत है ये कहना और जगत नहीं है ये कहना'' है और नहीं है इस प्रकार से वचन विरोध आता है, [**न हि सतोऽन्यथात्वं मिथ्यात्वं भवति**] यदि कोई सत्तात्मक वस्तु है फिर मिथ्या कैसे हो सकती है?। [**तथाऽन्यदन्यात्मनाऽवभासते जगद् यथा रजतात्मना शुक्तिरवभासते तद्वज्जगदन्यात्मनाऽवभासते तद्वचनविरुद्धं यदा जगतोऽसत्त्वं तदाऽसत्त्वं सत्त्वात्मनाऽवभासेतेति नावसरः सर्वस्यान्यथात्वान्मिथ्यात्वात् पुनः किं केन रूपेणावभासेत**] तथा एक वस्तु किसी दूसरे रूप में दिख रही है जैसे चाँदी एक रूप में सीपी दिखती है ऐसे ही है तो कुछ और लेकिन जगत रूप में दिख रहा है। ऐसा माना जाए तो। ये बात अपने ही वचन के विरुद्ध है जब आपने जगत की असत्ता मान ली तब ऐसी स्थिति में जो वस्तु है ही नहीं, फिर वह है के रूप में कैसे प्रतीत होगा? वह तो अभाव रूप हो गया फिर अभाव भावरूप में कैसे दिखेगा। क्योंकि जगत की प्रत्येक वस्तु आपने मिथ्या मान ली फिर कौन सी वस्तु किस रूप में दिखेगी?। [**तस्मान्न जगच्छुक्तौ रजतवदन्यथाऽभिव्यक्तं ख्यातं**] वा इसलिए जो जगत है वह सीपी में चाँदी के समान अभिव्यक्त नहीं हो रहा, वास्तविक जगत जगत के रूप में ही दिख रहा है ।।५५।।

(सदसत्ख्यातिः) सदसत्ख्यानम्-यत्खलु वस्तु प्रादुर्भवति तस्य सदसत्ख्यानमभिव्यक्तत्वं दर्शनं वा भवति, वेदानां जगतोऽपि प्रादुर्भूतत्वमभिव्यक्तत्वं सदसदात्मना विज्ञेयम्। कुतः (बाधाबाधात्) अबाधात्यावन्न स्याद् बाधोऽभावस्तावत् सद्रूपेण ख्यानं दर्शनं वर्तमानत्वं वा, बाधात्-यदा बाधोऽभावो भवेत् तदाऽसद्रूपेण वर्तमानत्वं भवति। यद्वा सदात्मकं बाधात् सद्भूतस्य विद्यमानस्यैव बाधः प्रलयेऽभावो भवति तस्मात् सदात्मकम्, असदात्मकं चाबाधान्न ह्यसद्रूपेण वर्तमानस्यानभिव्यक्तस्याभावो भवति। तस्माज्जगदिदं पर्यायेण सदसद्धर्मकमस्ति न नितान्तं सन्न नितान्तमसदित्यर्थः ।।५६।।

इदानीं शब्दविषये सांख्यसिद्धान्तः पक्षविपक्षाभ्यां प्रदर्श्यते -

प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः ।।५७।।

सदसत्ख्यातिर्बाधाबाधात् ।।५६।।

सूत्रार्थ= वेद और जगत कभी प्रकट हो जाते हैं और कभी अप्रकट हो जाते हैं, सृष्टि काल में इनकी सत्ता देखी जाने से और प्रलयकाल में न देखी जाने से।

[**(सदसत्ख्यातिः) सदसत्ख्यानम्-यत्खलु वस्तु प्रादुर्भवति तस्य सदसत्ख्यानमभिव्यक्तत्वं दर्शनं वा भवति**] जो वस्तु हमारे समक्ष प्रकट होती है वह कभी सद होती है कभी असद, दोनों रूप होते हैं तब उसकी ठीक प्रकार से अभिव्यक्ति मानी जाती है, [**वेदानां जगतोऽपि प्रादुर्भूतत्वमभिव्यक्तत्वं सदसदात्मना विज्ञेयम्**] वेद भी प्रकट हुए जगत भी प्रकट हुआ, इनका दोनों रूप मानने चाहिए कभी सद रूप में कभी असद रूप में। **कुतः** क्योंकि [**(बाधाबाधात्) अबाधात्यावन्न स्याद् बाधोऽभावस्तावत् सद्रूपेण ख्यानं दर्शनं वर्तमानत्वं वा**] जब तक इसका बाध (विनाश) नहीं होगा तब तक सत्तारूप में ये जगत रहेगा अथवा इनकी वर्तमानता बनी रहेगी, [**बाधात्यदा बाधोऽभावो भवेत् तदाऽसद्रूपेण वर्तमानत्वं भवति**] दूसरा हेतु-जब प्रलय होगी और इनका बाध (विनाश) होगा तब ये असद रूप से विद्यमान रहेंगे। [**यद्वा सदात्मकं बाधात् सद्भूतस्य विद्यमानस्यैव बाधः प्रलयेऽभावो भवति तस्मात् सदात्मकम्**] यहाँ दूसरी व्याख्या करते हैं- जो सदात्मक वस्तु है उसका बाध हो जाता है, टूटना नष्ट होना किसी सत्तात्मक वस्तु का ही होगा इसलिए वह सदात्मक है, [**असदात्मकं चाबाधान्न ह्यसद्रूपेण वर्तमानस्यानभिव्यक्तस्याभावो भवति**] जो असदात्मक हो उसका भाव हो सकता है और जो शून्य हो, प्रलय में जो अभाव रूप से वर्तमान हो जो प्रकट नहीं है उसका अभाव नहीं होता। [**तस्माज्जगदिदं पर्यायेण सदसद्धर्मकमस्ति न नितान्तं सन्न नितान्तमसदित्यर्थः**] इसलिए यह जगत क्रमशः सद धर्म वाला फिर असद धर्म वाला होता है न तो हमेशा सद रहेगा और न ही सदैव असद, ये अर्थ हुआ।।५६।।

अब सांख्य सिद्धान्त में शब्द के विषय में पक्ष विपक्ष में चर्चा आरंभ करते हैं-

(स्फोटात्मकः-शब्दः-न) वाचा खलूच्चार्यमाणः श्रोत्राभ्यां श्रूयमाणशब्दो ध्वन्यात्मकः पुनरुच्चारणानन्तरमर्थस्य स्फुटीकरणहेतुत्वाद् ध्वन्यात्मकाद् भिन्नः स्फोटात्मकः कल्प्यते। अत्र सांख्यसिद्धान्ते स न स्वीक्रियतेऽत एवोच्यते स्फोटात्मकः शब्दो नास्ति। कुतः। उच्यते (प्रतीत्यप्रतीतिभ्याम्) वस्तुनोऽस्तित्वनास्तित्वसाधने प्रतीत्यप्रतीति भवतः, यः प्रतीयते सोऽस्ति यश्च न प्रतीयते स नास्ति। ध्वन्यात्मकस्य शब्दस्य तु प्रतीतिरस्ति तदनन्तरं स्फोटात्मको यः कल्पयते तस्याप्रतीतिरस्ति। तस्मात् स्फोटात्मकः शब्दो न स्वीक्रियते सांख्यसिद्धान्ते ।।५७।।

ननु स्फोटात्मकः शब्दो न स्वीक्रियते किं शब्दो नित्यः स्वीक्रियते इत्याकांक्षायामुच्यते -

---

प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः ।।५७।।

सूत्रार्थ= किसी वस्तु की सत्ता है वह प्रतीति से सिद्ध होती है और किसी वस्तु की सत्ता नहीं है वो उसकी अप्रतीति से सिद्ध होती है। स्फोटात्मक शब्द की प्रतीति होती नहीं।

[**(स्फोटात्मकः-शब्दः-न) वाचा खलूच्चार्यमाणः श्रोत्राभ्यां श्रूयमाणशब्दो ध्वन्यात्मकः पुनरुच्चारणानन्तरमर्थस्य स्फुटीकरणहेतुत्वाद् ध्वन्यात्मकाद् भिन्नः स्फोटात्मकः कल्पयते**] वाणी से उच्चारण किया जाता हुआ और दोनों कानों से सुना जाता हुआ शब्द ध्वन्यात्मक है और फिर उच्चारण के पश्चात् अर्थ को प्रकट करने के हेतु से इस ध्वन्यात्मक शब्द से भिन्न स्फुटात्मक नाम से कल्पित किया जाता है, जो अर्थ को प्रकट करता है [(वार्ता करते हैं- वाणी से शब्द बोला कान से सुनते हैं ये हैं ध्वन्यात्मक शब्द। ध्वनि सुनी और समाप्त हो गयी फिर अर्थ कैसे पता चला? उस अर्थ को समझाने के लिए एक और ध्वनि की कल्पना करते है जो स्फोटात्मक है। कंठ से बोलते हैं वह है ध्वन्यात्मक, और जो मस्तिष्क में रहता है वह स्फोटात्मक है जो अर्थ को प्रकट करता है)। **अत्र सांख्यसिद्धान्ते स न स्वीक्रियतेऽत एवोच्यते स्फोटात्मकः शब्दो नास्ति**] यहाँ सांख्य के सिद्धान्त में उस स्फोटात्मक शब्द को स्वीकार नहीं किया जाता, इसलिए कहा जा रहा है की सांख्य में स्फोटात्मक शब्द नहीं है। [**कुतः क्यों। उच्यते (प्रतीत्यप्रतीतिभ्याम्) वस्तुनोऽस्तित्वनास्तित्वसाधने प्रतीत्यप्रतीति भवतः**] कहा है- वस्तु का अस्तित्व है अथवा नहीं है इन दोनों को सिद्ध करने वाले दो साधन एक प्रतीति और दूसरी अप्रतीति होते हैं, [**यः प्रतीयते सोऽस्ति यश्च न प्रतीयते स नास्ति**] जो प्रतीत होती है वह वस्तु है जो प्रतीत नहीं होती वह नहीं है। [**ध्वन्यात्मकस्य शब्दस्य तु प्रतीतिरस्ति तदनन्तरं स्फोटात्मको यः कल्प्यते तस्याप्रतीतिरस्ति**] ध्वन्यात्मक शब्द की प्रतीति तो हो ही रही है इसके बाद जो स्फोटात्मक शब्द कल्पित किया जाता है उसकी यहाँ प्रतीति नहीं होती। [**तस्मात् स्फोटात्मकः शब्दो न स्वीक्रियते सांख्यसिद्धान्ते**] इसलिए स्फोटात्मक शब्द को सांख्य के सिद्धान्त में स्वीकार नहीं किया जाता ।।५७।।

प्रश्न है कि स्फोटात्मक शब्द स्वीकार नहीं किया, फिर क्या आप शब्द को नित्य मानते हैं? इस

न शब्दनित्यत्वं कार्यताप्रतीतेः ।।५८।।

(शब्दनित्यत्वं न) शब्दस्य नित्यत्वं नास्ति। कुतः (कार्यताप्रतीतेः) कार्यतायाः प्रतीतेः, प्रत्यक्षं ह्युच्चारणेनोत्पद्यते खलु शब्दः ।।५८।।

ननु सांख्यमते स्फोटात्मकः शब्दो न मन्यते न च शब्दस्य नित्यत्वं स्वीक्रियते, तदा शब्दोच्चारणात् पश्चात् तस्योभयप्रकाराभ्यां स्थिरत्वाभावादर्थप्रतीतिः कथं भविष्यतीत्यत्रोच्यते -

पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ।।५९।।

(पूर्वसिद्धसत्त्वस्य-अभिव्यक्तिः-दीपेन-इव घटस्य) उच्चरितेन शब्देन पूर्वतःसिद्धस्य सत्त्वस्यार्थस्याभिव्यक्तिर्भवति यथा दीपेन घटस्य पूर्वतो वर्तमानस्याभिव्यक्तिः प्रकटता भवति,

---

आकांक्षा पर कहते हैं-

न शब्दनित्यत्वं कार्यताप्रतीतेः ।।५८।।

सूत्रार्थ= शब्द नित्य नहीं है, उसकी उत्पत्ति होने से अर्थात् कार्यपन दिखाई देने से।

[(शब्दनित्यत्वं न) शब्दस्य नित्यत्वं नास्ति । कुतः (कार्यताप्रतीतेः) कार्यतायाः प्रतीतेः, प्रत्यक्षं ह्युच्चारणेनोत्पद्यते खलु शब्दः] शब्द की नित्यता नहीं है, कैसे-कार्यता के प्रतीत होने से, प्रत्यक्ष ही शब्द उच्चारण से शब्द उत्पन्न होता है (जब उत्पन्न होता है तो नष्ट भी होगा)।।५८।।

प्रश्न है- सांख्यमत में स्फोटात्मक शब्द को नहीं माना जाता और न ही शब्द की नित्यता स्वीकार करते हैं। तब शब्दोचारण के बाद उसके दोनों ही प्रकार से स्थिरता न होने से अर्थ कि प्रतीति कैसे होग़ी? इसका उत्तर देते हैं-

पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ।।५९।।

सूत्रार्थ= शब्द को सुनने से पूर्व ज्ञात पदार्थ का ज्ञान हो जाता है, जैसे दीपक से घड़े का ज्ञान हो जाता है।

[(पूर्वसिद्धसत्त्वस्य-अभिव्यक्तिः-दीपेन-इव घटस्य) उच्चरितेन शब्देन पूर्वतःसिद्धस्य सत्त्वस्यार्थस्याभिव्यक्तिर्भवति यथा दीपेन घटस्य पूर्वतो वर्तमानस्याभिव्यक्तिः प्रकटता भवति] (जो शब्द उच्चारण किया उस बोले गए शब्द से अर्थ तो पहले से ही जानते हैं) सुने हुए शब्द से पहले से विद्यमान अर्थ कि अभिव्यक्ति हो जाती है, जैसे दीपक के प्रकाश से पहले विद्यमान घट आदि (जो घर में रखे थे) कि अभिव्यक्ति हो जाती है, **[दीपेन दृष्टं घटमुत्थाप्य गच्छति जनः]** दीपक के जलने से घड़े को देखकर उठाकर लोग ले जाते हैं, **[घटदर्शनकाले दीपस्यावश्यकता स्वायत्तीकृते घटे न दीपोऽपेक्ष्यते दीपदृष्टान्तस्य प्रकाशकत्वमात्रमेव गृह्यते]** घटदर्शन काल में दीपक की आवश्यकता होती है हाथ में उठा लेने पर फिर दीपक की आवश्यकता नहीं रहती। यहाँ जो दीपक का दृष्टांत् दिया वह बहुत सीमित है दीपक से प्रकाश मात्र

दीपेन दृष्टं घटमुत्थाप्य गच्छति जनः, घटदर्शनकाले दीपस्यावश्यकता स्वायत्तीकृते घटे न दीपोऽपेक्ष्यते दीपदृष्टान्तस्य प्रकाशकत्वमात्रमेव गृह्यते। तस्माच्छब्दस्य स्फोटात्मकतया यद्वा नित्यभावेन स्थिरत्वं नापेक्ष्यते।।५९।।

एवं तु सत्कार्यसिद्धान्त आपतति । उच्यते -

सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनम् ।।६०।।

(सत्कार्यसिद्धान्तः-चेत् सिद्धसाधनम्) सत्कार्यसिद्धान्तश्चेत् तदा सिद्धस्य सांख्याभिमतस्य सिद्धपक्षस्य साधनं तदभीष्टमेव, न दोषः ।।६०।।

अथान्तिमसूत्रद्वयस्यान्योऽर्थः, तत्र पुनः पूर्वपक्षत्वेनोच्यते -

का ग्रहण करने तक का दृष्टांत है। **[तस्माच्छब्दस्य स्फोटात्मकतया यद्वा नित्यभावेन स्थिरत्वं नापेक्ष्यते]** इसलिए शब्द का स्फोटात्मक रूप से अथवा नित्य होने से स्थिर हो ऐसी अपेक्षा नहीं है।।५९।।

पूर्वपक्षी कहता है- इससे तो सत्कार्य सिद्धान्त आ जाएगा? सिद्धांती कहता है-

सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनम् ।।६०।।

सूत्रार्थ=यदि पूर्वपक्षी ऐसा कहे कि- उपर बाले शब्द की व्याख्या में सत्कार्यवाद सिद्ध हो जाएगा? ऐसा होने से स्वीकारित बात की सिद्धि होती है।

[(सत्कार्यसिद्धान्तः-चेत् सिद्धसाधनम्) सत्कार्यसिद्धान्तश्चेत् तदा सिद्धस्य सांख्याभिमतस्य सिद्धपक्षस्य साधनं तदभीष्टमेव, न दोषः] (कार्य उत्पत्ति अभिव्यक्ति से पूर्व विद्यमान होना-सत्कार्यवाद है) सत्कार्य सिद्धान्त हो, सांख्य में जो पहले से स्वीकार्य है (सत्कार्यवाद) उस पक्ष की दुबारा सिद्धि होती है, ऐसा मानने से वह अभीष्ट ही है, उसमें कोई दोष नहीं है।।६०।।

अब अंतिम दो सूत्रों की दूसरी प्रकार से व्याख्या करते हैं- यहाँ पूर्वपक्ष की तरफ से कहा जा रहा है

पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ।।५९।।

सूत्रार्थः-

[(पूर्वसिद्धसत्त्वस्य-अभिव्यक्तिः-दीपेन-इव घटस्य) यदा शब्दो न स्फोटात्मको न च नित्यस्तदा तु पूर्व सिद्धं सत्त्वं स्वरूपं यस्य तथाभूतस्यार्थस्य शब्दोच्चारणेनाभिव्यक्तिर्भवति सत्कार्यतया] जब शब्द स्फोटात्मक नहीं है और सांख्यमत के अनुसार नित्य भी नहीं है, तब तो पहले से रखे पदार्थ के अर्थ

पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ।।५९।।

(पूर्वसिद्धसत्त्वस्य-अभिव्यक्तिः-दीपेन-इव घटस्य) यदा शब्दो न स्फोटात्मको न च नित्यस्तदा तु पूर्वं सिद्धं सत्त्वं स्वरूपं यस्य तथाभूतस्यार्थस्य शब्दोच्चारणेनाभिव्यक्तिर्भवति सत्कार्यतया यथा दीपेन घटस्य सदात्मनः पूर्वतो वर्तमानस्याभिव्यक्तिर्भवतीति मन्तव्यं भवेत् ।।५९।।

उत्तरयति -

सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनम् ।।६०।।

(सत्कार्यसिद्धान्तः-चेत् सिद्धसाधनम्) एष पूर्वतः सदात्मनो वर्तमानस्याभिव्यक्तिवादस्तु सत्कार्यसिद्धान्तः सांख्येऽभीष्टः स चेदापतेत् तर्हि (सिद्धसाधनम्) सांख्ये सिद्धस्य पक्षस्य साधनं न तु दोषः ।।६०।।

की उच्चारण से अभिव्यक्ति हो जाती है, सत्कार्य के नियम से **[यथा दीपेन घटस्य सदात्मनः पूर्वतो वर्तमानस्याभिव्यक्तिर्भवतीति मन्तव्यं भवेत्]** जैसे दीपक से घट की (जो कि पहले से विद्यमान है) अभिव्यक्ति हो जाती है उससे ये भी मानना पड़ेगा कि शब्द के सुनने से पहले अर्थ प्रकट हो जाता है ।।५९।।

उत्तरयति -अब सिद्धांती उत्तर देता है-

सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनम् ।।६०।।

[(सत्कार्यसिद्धान्तः-चेत् सिद्धसाधनम्) एष पूर्वतः सदात्मनो वर्तमानस्याभिव्यक्तिवादस्तु सत्कार्यसिद्धान्तः सांख्येऽभीष्टः स चेदापतेत् तर्हि (सिद्धसाधनम्) सांख्ये सिद्धस्य पक्षस्य साधनं न तु दोषः] ये जो पहले से विद्यमान वस्तु का अभिव्यक्तिवाद है यह सत्कार्य सिद्धान्त सांख्य में अभीष्ट है तो सांख्य में जो पहले से सिद्ध है उसे पुनः सिद्ध किया। इसमें कोई दोष नहीं है ।।६०।।

सत्कार्यवाद सत्तात्मक और असत्तात्मक वस्तु का प्रकट होना जीवात्मा के कर्मों की बजह से जगत में भिन्नता होना और जीवात्मा-प्रकति की सत्ता से आश्रित होकर ये सब सिद्ध होती है, परंतु किसी ने कल्पना की जीवात्मा और प्रकृति को कल्पना मान लें, किन्तु जीवात्मा के स्वरूप से भिन्न वस्तु नहीं हैं। इस मान्यता का खंडन करने के लिए ये सूत्र आगे बताता है-

नाद्वैतमात्मनो लिंगात् तद्भेदप्रतीतेः ।।६१।।

सूत्रार्थ=आत्मा एक नहीं हो सकता दो आत्मा हैं दोनों के लक्षण से दोनों के भेद प्रतीत होते हैं।

सत्कार्यवादः सदसद्भ्यां वस्तुनः ख्यानं जीवात्मनः कर्मवशाज्जगद्वैविध्यमिति जीवात्मनः प्रकृतेश्च सत्तामाश्रित्य साध्यते परन्तु भवेतां प्रकृतिजीवात्मानौ किन्तु ब्रह्मात्मनः स्वरूपतो भिन्नवस्तुनी नेति कल्पनां निराकर्तुमाह -

नाद्वैतमात्मनो लिंगात् तद्भेदप्रतीतेः ।।६१।।

(आत्मनः-अद्वैतं न) आत्मा नैक एव, न हि ब्रह्मात्मैव किन्तु जीवात्माऽप्यस्ति। यतः (लिंगात् तद्भेदप्रतीतेः) ब्रह्मात्मजीवात्मनोः पृथक् पृथग्लिंगात् तयोर्भेदप्रत्यक्षात्। तद्यथा - ''द्वा सुपर्णा सयुजा सखाया सामनं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ।।'' (ऋ० १.१६४.२०) ।।६१।।

प्रकृत्या सह स्याद् ब्रह्मात्मनोऽभेदः सोऽपि -

[(आत्मनः-अद्वैतं न) आत्मा नैक एव, न हि ब्रह्मात्मैव किन्तु जीवात्माऽप्यस्ति] आत्मा ही एक नहीं है, ब्रह्म भी है, प्रकृति भी है, जीवात्मा भी है। यतः क्योंकि **[(लिंगात् तद्भेदप्रतीतेः) ब्रह्मात्मजीवात्मनोः पृथक् पृथग्लिंगात् तयोर्भेदप्रत्यक्षात्]** जीव और ब्रह्म दोनों एक नहीं हैं क्योंकि दोनों के लक्षण अलग अलग है, दोनों का भेद प्रत्यक्ष है। **तद्यथा** जैसे कि- **[''द्वा सुपर्णा सयुजा सखाया सामनं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।।''(ऋ० १.१६४.२०)]** दो सुंदर पंखों वाले पक्षी हैं मित्रभाव से साथ-साथ रहते हैं एक ही वृक्ष पर दोनों विराजमान हैं। उन दो में से एक पक्षी वृक्ष के फल खाता है, दूसरा पक्षी फल को न खाता हुआ पहले वाले पक्षी के कर्मों को देखता रहता है ।।६१।।

प्रकृति और ब्रह्म का अभेद नहीं है-

नानात्मनाऽपि प्रत्यक्षबाधात् ।।६२।।

सूत्रार्थ=प्रकृति के साथ भी ब्रह्म का एकत्व नहीं है, दोनों को एक मानने पर जगत के नाश आदि धर्म ब्रह्म में भी मानने पड़ेंगे।

[(अनात्मना-अपि न) अनात्मना जडेन प्रकृत्याख्येन प्रधानेन सहापि नाद्वैतमपार्थक्यमैक्यम्] जो अनात्मा है जड़ वस्तु प्रकृति है उस प्रधान नामक वस्तु का ब्रह्म के साथ अद्वैत नहीं है। **[यतः (प्रत्यक्षबाधात्) प्रत्यक्षं हि दृश्यते प्रकृतिपरिणामो जगन्नश्यमानं तत्रापि नश्वरधर्मत्वमापद्येत]** क्योंकि प्रत्यक्ष ही ये दिखता है कि प्रकृति में परिणाम होता है और जगत नाशवान है यदि ब्रह्म और प्रकृति को एक मान लें तो ब्रह्म में भी नाश का धर्म आ जाएगा **[किन्तु स तु प्रकृतिं परिणामयति ''एकं बीजं बहुधा यः करोति'' (श्वेता०**

नानात्मनाऽपि प्रत्यक्षबाधात् ।।६२।।

(अनात्मना-अपि न) अनात्मना जडेन प्रकृत्याख्येन प्रधानेन सहापि नाद्वैतमपार्थक्यमैक्यम् । यतः (प्रत्यक्षबाधात्) प्रत्यक्षं हि दृश्यते प्रकृतिपरिणामो जगन्नश्यमानं तत्रापि नश्वरधर्मत्वमापद्येत किन्तु स तु प्रकृतिं परिणमयति ''एकं बीजं बहुधा यः करोति'' (श्वेता० ६.१२) ।।६२।।

प्रकृतिजीवात्माभ्यामुभाभ्यां सह सकृदैकात्म्यं गतः स्यात्। अत्रोच्यते -

नोभाभ्यां तेनैव ।।६३।।

(उभाभ्यां न तेन-एव) प्रकृतिजीवात्माभ्यामुभाभ्यां सहापि नाद्वैतं गतो भवति तेन पूर्वोक्तेनैव लिंगभेदप्रत्यक्षबाधरूपेण हेतुना ।।६३।।

कथं तर्हयद्वैतकथनं श्रुतौ ''आत्मा वा इदमेक एवाग्र आसीत्'' (ऐ०उ० १.१.१) । अत्रोच्यते

६.१२)] जबकि श्रुति तो यह कह रही है कि परमात्मा प्रकृति को परिणामित करता है ''जो एक रूप प्रकृति को बहुत रूप बना देता है'' इससे पता चलता है कि वह ब्रह्म प्रकृति से भिन्न है ।।६२।।

प्रकृति और जीवत्मा दोनों को ब्रह्म के साथ एक हों, ऐसा भी नहीं है-

नोभाभ्यां तेनैव ।।६३।।

सूत्रार्थ= प्रकृति और जीव दोनों के साथ ब्रह्म की एकता नहीं है पूर्वोक्त हेतुओं से।

[(उभाभ्यां न तेन-एव) प्रकृतिजीवात्मभ्यामुभाभ्यां सहापि नाद्वैतं गतो भवति तेन पूर्वोक्तेनैव लिंगभेदप्रत्यक्षबाधरूपेण हेतुना] प्रकृति और जीवात्मा के साथ इकट्ठा भी अद्वैत नहीं हो सकता ब्रह्म का, क्योंकि जीव और ब्रह्म की भिन्नता बताई थी उनके भिन्न लक्षण के कारण बताई थी और प्रकृति व ब्रह्म की एकता का भी खंडन पूर्वसूत्र में हुआ था ।।६३।।

पूर्वपक्षी कहता है यदि प्रकृति ब्रह्म जीव सब एक नहीं है फिर श्रुति में अद्वैत का कथन क्यों हुआ ''सृष्टि बनने से पूर्व आत्मा ही एक था'' यहाँ एक ब्रह्म की बात क्यों कही गयी प्रकृति और जीव की क्यों चर्चा नहीं की-

अन्यपरत्वमविवेकानां तत्र ।।६४।।

सूत्रार्थ=उस श्रुति में केवल यह मानना की ब्रह्म ही था ये अज्ञानी लोगों की मान्यता है, जबकि वो श्रुति अन्य (सृष्टि रचना) प्रसंग में है।

[(तत्र-अविवेकानाम्) तत्र श्रुतौ खल्वद्वैतकल्पनं विवेकरहितानामेव] उस वचन में केवल ब्रह्म की कल्पना करना ये अज्ञानी लोगों की बात है, **[यतः (अन्यपरत्वम्) श्रुतेरन्यपरत्वं सृष्टिरचनापरत्वमस्ति]** क्योंकि वहाँ पर पदार्थों की सत्ता का निर्णय नहीं हो रहा था (पदार्थों की सत्ता का प्रकरण नहीं था) वहाँ तो केवल सृष्टि की रचना का प्रकरण है, **[''आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् स ईक्षते**

-

अन्यपरत्वमविवेकानां तत्र ।।६४।।

(तत्र-अविवेकानाम्) तत्र श्रुतौ खल्वद्वैतकल्पनं विवेकरहितानामेव, यतः (अन्यपरत्वम्) श्रुतेरन्यपरत्वं सृष्टिरचनापरत्वमस्ति ''आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् स ईक्षते लोकान्नु सृजा इति'' (ऐ०उ० १.१.१) सृष्टितः पूर्वं चेष्टमानो ब्रह्मात्मा ह्यासीज्जीवात्मानो निश्चेष्टा आसन् प्रकृतिरपि निश्चेष्टाऽऽसीत् ।।६४।।

भवतु श्रुतिः सृष्टिरचनापरा परन्तु तत्र जगत्कारणत्वं ब्रह्मात्मनः किमुपादानत्वेन? न वेत्याकांक्षायामाह-

लोकान्नु सृजा इति''(ऐ०उ० १.१.१)] सृष्टि बनने से पूर्व जब प्रलय की स्थिति थी, उस समय एक परमात्मा ही चेतन होश में था और कोई भी चेष्टा करने में समर्थ नहीं था । उसने विचार किया, मै लोकलोकांतरों को बनाता हूँ **[सृष्टितः पूर्वं चेष्टमानो ब्रह्मात्मा ह्यासीज्जीवात्मानो निश्चेष्टा आसन् प्रकृतिरपि निश्चेष्टाऽऽसीत्]** सृष्टि से पूर्व क्रियाशील ज्ञानवान केवल ईश्वर ही था बाकी जीवात्माएं भी थी किन्तु वे निश्चेष्ट थीं और प्रकृति भी क्रिया शून्य थी।।६४।।

चलो मान लिया की वह श्रुति सृष्टि रचना से संबन्धित हो, परंतु जो परमात्मा जगत का कारण है, जिससे ये जगत बनाया बो कौन सा कारण है? इस प्रश्न के उत्तर में कहते हैं-

नात्माऽविद्या नोभयं जगदुपादानकारणं निःसंगत्वात् ।।६५।।

सूत्रार्थ= जगत का उपादान कारण परमात्मा नहीं है और न अविद्या है। क्योंकि वह वस्तु (परमाणुरूप) रूप नहीं है, और न ही ये इकट्ठे मिलकर के बन सकते। तीन पक्षों का खंडन हुआ। तीनों ही पक्षो में ये जगत का उपादान कारण नहीं हो सकते निःसंग होने से।

[(आत्मा-अविद्या जगदुपादानकारणं न-उभयं न निःसंगत्वात्) ब्रह्मात्मा जगतो नोपादानकारणं निःसंगत्वात्] ब्रह्म जगत का उपदान कारण नहीं है, निःसंग होने से, **[उपादानं हि खलु कमप्यन्यं संगत्यैव कार्यात्मना भासते]** उपादान किसी अन्य चेतन वस्तु की संगति करके ही कार्य रूप में प्रतीत होता है **[मृत्तिका यथा कुम्भकारं दण्डचक्रादिकं संगत्य घटरूपेण कार्यात्मना सञ्जायते]** जैसे मिट्टी उपादान कारण है घड़े का और वह कुंभकार दण्ड चाक आदि की संगति करके घट के रूप में कार्य रूप में प्रकट हो जाती है। **[अविद्याऽपि नोपादानकारणम्]** अविद्या भी जगत का उपादान कारण नहीं है, **[अविद्या हि खल्ववस्तुरूपा न ह्यवस्तु संसर्गसमर्थम्]** अविद्या अवस्तु (ठोस पदार्थ नहीं है) रूप है, इसलिए अवस्तु संसर्ग में समर्थ नहीं होती, **[ब्रह्मात्माऽथाविद्या च परस्परं संगत्योपादनं भवेत् तदपि न निःसंगत्वादेव नहि वस्त्ववस्तुनोः संगो भवति]** ब्रह्म और अविद्या दोनों आपस में मिलकर किसी अन्य वस्तु की संगति करके जगत का उपादान बन जाए ऐसा भी नहीं हो सकता। क्योंकि वो सब निःसंग हैं इसलिए दोनों मिलकर के

नात्माऽविद्या नोभयं जगदुपादानकारणं निःसंगत्वात् ।।६५।।

(आत्मा-अविद्या जगदुपादानकारणं न-उभयं न निःसंगत्वात्) ब्रह्मात्मा जगतो नोपादानकारणं निःसंगत्वात्, उपादानं हि खलु कमप्यन्यं संगत्यैव कार्यात्मना भासते मृत्तिका यथा कुम्भकारं दण्डचक्रादिकं संगत्य घटरूपेण कार्यात्मना सञ्जायते । अविद्याऽपि नोपादानकारणम्, अविद्या हि खल्ववस्तुरूपा न ह्यवस्तु संसर्गसमर्थम्, ब्रह्मात्माऽथाविद्या च परस्परं संगत्योपादनं भवेत् तदपि न निःसंगत्वादेव नहि वस्त्ववस्तुनोः संगो भवति । एवं सांख्यमते ब्रह्मात्मा जगत उपादानकारणं न किन्तूपादानकारणमन्तरेण भवतु निमित्तकारणमिति न निषेधस्तस्मान्निमित्तकारणम् ।।६५।।

आत्माद्वैतं निरस्तं परमात्मा जीवात्मा च स्तः, तत्र विशेषोऽवधार्यते -

नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात् ।।६६।।

(द्वयोः-एकस्य-आनन्दचिद्रूपत्वे न) परमात्मजीवात्मनोरेकस्य जीवात्मन आनन्दचिद्रूपत्वे

उपादान नहीं हो सकते और ब्रह्म वस्तु तो है पर अविद्या अवस्तु है ऐसे भी संग नहीं हो सकता। **[एवं सांख्यमते ब्रह्मात्मा जगत उपादानकारणं न]** इस प्रकार से सांख्यमत में ब्रह्म जगत का उपादान कारण नहीं है **[किन्तूपादानकारणमन्तरेण भवतु निमित्तकारणमिति न निषेधस्तस्मान्निमित्तकारणम्]** किन्तु उपादान कारण से भिन्न वह निमित्त कारण हो सकता है, उपादान कारण का निषेध है निमित्त कारण का नहीं ।।६५।।

आत्मा एक है इस बात का खंडन हो चुका। अब दोनों में भेद क्या है? ये बताएँगे-

नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात् ।।६६।।

सूत्रार्थ= जीवात्मा और परमात्मा एक नहीं है, क्योंकि जीवात्मा में आनन्द का अभाव है और वह केवल चेतन स्वरूप है। इस प्रकार दोनों में भेद की श्रुति होने से।

[(द्वयोः-एकस्य-आनन्दचिद्रूपत्वे न) परमात्मजीवात्मनोरेकस्य जीवात्मन आनन्दचिद्रूपत्वे न स्तः स तु चिदेव परमात्मनस्तु स्त एव] दो चेतन है एक परमात्मा दूसरा जीवात्मा । इनमें से एक में आनन्द और चिद्रूपता ये दोनों गुण जीवात्मा में नहीं है, परमात्मा में ये दोनों हैं । जीवात्मा केवल चेतन ही है उसमें आनन्द नहीं है, **[कुतः (भेदात्) भेदेन वर्णनात् ''रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति']** शास्त्रों में दोनों का भेद से वर्णन है ''वह (ईश्वर) आनन्द से परिपूर्ण हैं'', इस रस (परमात्मा) को प्राप्त करके वह जीवात्मा आनंदी हो जाता है **[(तै०उ० २.७) अत्राऽऽनन्दो जीवात्मनि नास्ति चेतनत्वमेवेति स्पष्टं]** यहाँ बताया जीवात्मा में आनन्द नहीं है चेतनता ही है केवल ये स्पष्ट है **[तथाऽऽनन्दस्तु परमात्मनि विद्यते]** तथा आनन्द तो परमात्मा में है **[तमानन्दरूपं लब्ध्वा हि जीवात्माऽऽनन्दमनुभवति]** उस आनन्द रूप परमात्मा को प्राप्त करके जीवात्मा आनन्द का अनुभव करता है ।।६६।।

पूर्वपक्षी ने प्रश्न उठाया- चलो जीवात्मा स्वरूप से आनन्द रूप न हो परंतु मुक्ति में तो आनन्द रूप हो जाएगा? इस पर कहते हैं-

न स्तः स तु चिदेव परमात्मनस्तु स्त एव, कुतः (भेदात्) भेदेन वर्णनात् ''रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तै०उ० २.७) अत्राऽऽनन्दो जीवात्मनि नास्ति चेतनत्वमेवेति स्पष्टं तथाऽऽनन्दस्तु परमात्मनि विद्यते तमानन्दरूपं लब्ध्वा हि जीवात्माऽऽनन्दमनुभवति ।।६६।।

जीवात्मा स्वरूपत आनन्दरूपो न भवेत् परन्तु मुक्तौ तु स्यात् स आनन्दरूपः । अत्रोच्यते -

दुःखनिवृत्तेर्गौणः ।।६७।।

(दुःखनिवृत्तेः-गौणः) मुक्तौ दुःखनिवृत्तिर्जायते तदा तत्रानन्दरूपो भवत्यात्मा गौणो न मुख्यः, न हि तदा स आनन्दरूपो भवति किन्तु स आनन्दी भवति तेनानन्दरूपेण परमात्मना सहानन्दी धनेन धनीव भवति ।।६७।।

तदाऽऽनन्दरूपत्वं तस्य -

दुःखनिवृत्तेर्गौणः ।।६७।।

सूत्रार्था= मुक्ति में दुःखों से हट जाने पर जीवात्मा आनन्द स्वरूप हो जाता है, यह गौण कथन है क्योंकि वह परमात्मा के आनन्द से आनंदी होता है। जैसे धनिक धन से धनी होता है।

[(दुःखनिवृत्तेः-गौणः) मुक्तौ दुःखनिवृत्तिर्जायते तदा तत्रानन्दरूपो भवत्यात्मा गौणो न मुख्यः] सिद्धांती कहता है कि- मुक्ति में दुःख की निवृत्ति हो जाएगी और वहाँ जीवात्मा आनन्द स्वरूप हो जाएगा। ऐसा यदि कोई कह दे तो ये गौण कथन है, मुख्य कथन नहीं, **[न हि तदा स आनन्दरूपो भवति किन्तु स आनन्दी भवति तेनानन्दरूपेण परमात्मना सहानन्दी धनेन धनीव भवति]** वह आनन्द रूप नहीं होता किन्तु आनंदी होता है जैसे कोई धनी हो जाता है धन से युक्त हो जाता है धन नहीं होता ऐसे ही परमात्मा के सानिध्य से वह आनंदी होता है ।।६७।।

फिर मुक्ति में जीवात्मा को आनन्द स्वरूप क्यों कह रहे हैं? इसका उत्तर देते हैं-

विमुक्तिप्रशंसा मन्दानाम् ।।६८।।

सूत्रार्थ=मुक्ति में आनन्द का प्रकट होना ये कथन सामान्य जनों में मुक्ति कि प्रति रुचि उत्पन्न होवे, इसलिए मुक्ति की प्रशंसा मात्र है, विवेकियों के लिए तो सम्पूर्ण दुःखों से छुटना ही मुक्ति है ।

[(विमुक्तिप्रशंसा मन्दानाम्) मुक्तावानन्दाभिव्यक्तिः खलु विमुक्तिप्रशंसा मन्दानां दृष्टौ विवेकिनां तु दुःखनिवृत्तिः] मुक्ति में आनन्द की अभिव्यक्ति होगी ये मुक्ति की प्रशंसा है मंद बुद्धि वालों की दृष्टि ये है कि वहाँ आनन्द मिलेगा विवेकी बुद्धिमान लोगों की दृष्टि ये है कि वहाँ दुःखों से छूट जाएंगे ।।६८।।

दुःख से छूटना मुक्ति है और आनन्द गौंण भाव है क्योंकि आनन्द तो सुख है । फिर सुख-दुःख की अनुभूति तो मन से होती है, मन व्यापक नहीं है कि जिससे मुक्ति में भी आनन्द की अनुभूति कर लेंगे। इस

विमुक्तिप्रशंसा मन्दानाम् ।।६८।।

(विमुक्तिप्रशंसा मन्दानाम्) मुक्तावानन्दाभिव्यक्तिः खलु विमुक्तिप्रशंसा मन्दानां दृष्टौ विवेकिनां तु दुःखनिवृत्तिः ।।६८।।

दुःखनिवृत्तिर्मुक्तिरानन्दो गौणभावेनोच्यते प्रशंसायां यत आनन्दः सुखम्, पुनः सुखदुःखानुभूतिर्मनसा भवति, मनसो न व्यापकत्वं यन्मुक्तावपि तेनानन्दानुभूतिः स्यादित्येवोच्यते -

न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा वास्यादिवच्चक्षुरादिवत् ।।६९।।

(मनसः-व्यापकत्वं न) मनसो विभुत्वं नास्ति (करणत्वात्वास्यादिवत्) करममुपकरणं साधनं साधनत्वात् कुठारादिवत् (वा) अथवा (इन्द्रियत्वात्-चक्षुरादिवत्) एकादशेन्द्रियेषु तस्येन्द्रियभावाच्चक्षुरादिवत्। यथेव हि कुठारादीनि साधनानि चक्षुरादीनीन्द्रियाणि न व्यापकानि सर्वत्र

विषय में कहते हैं-

न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा वास्यादिवच्चक्षुरादिवत् ।।६९।।

सूत्रार्थ=मन सर्वव्यापक नहीं है कुठार आदि के समान साधन होने से तथा चक्षु आदि के समान इंद्रिय होने से।

सम्बन्धधर्मी] क्योंकि धर्म है सम्बंध, सम्बंध धर्म है जिसका वह है सम्बंध धर्मी **[तौ धार्मिणौ तयोरजयोर्धर्मिणोः प्रकृतिपुरुषयोर्धर्मिणोर्ग्राहकप्रमाणस्य बाधनात्]** वे धर्मी (प्रकृति और पुरुष) उन धर्मियों के, उनको स्वाभाविक सिद्ध कराने वाला प्रमाण खंडित होने से **[तयोर्धर्मित्वेन सम्बन्धधर्मित्वेन ग्राहकं प्रमाणं बाध्यते]** प्रकृति पुरुष को धर्मी के रूप में स्वाभाविक सम्बंध धर्मी के रूप में ग्रहण करने वाला ज्ञान कराने वाला प्रमाण खंडित हो जाता है, इसलिए इनमें कोई स्वाभाविक सम्बंध नहीं है। **[न तथाभूतौ प्रकृतिपुरुषौ प्रमाणं साधयितुं समर्थम्]** प्रकृति पुरुष को उस प्रकार का स्वाभाविक सम्बंध सिद्ध करने वाला कोई भी प्रमाण सिद्ध नहीं है। **[यतः प्रकृतिस्तु जड़ाऽचेतना च न सा पुरुषेण सह सम्बन्धस्थापनाय स्वतन्त्रा समर्था च तस्या जडत्वादचेतनत्वात्]** क्योंकि प्रकृति तो जा् वस्तु है अचेतन है वह पुरुष के साथ सम्बंध स्थापित करने में स्वतंत्र नहीं है समर्थ नहीं है और उसके जड़ होने से। **[पुरुषश्च नित्यशुद्धबुद्धमुक्तस्वभावः प्रकृत्या सह सम्बन्धस्थापनाय नाभिलाषवान् तस्य नित्यशुद्धबुद्धमुक्तस्वभाववत्त्वात्]** पुरुष (ईश्वर) नित्य शुद्ध बुद्ध मुक्त स्वभाव वाला है वह प्रकृति के साथ सम्बंध जोड़ने की कोई अभिलाषा नहीं रखता क्योंकि वह तो नित्य-शुद्ध-बुद्ध-मुक्त स्वभाव वाला है, **[तथा पुरुषो जीवात्मा न स्वभावतो बद्ध इति पूर्वतः प्रतिपादितत्वात् स्वभावतोऽपि प्रकृत्या सह तस्य सम्बन्धो न घटते]** तथा जीव और प्रकृति का स्वाभाविक सम्बंध होता तो वह बद्ध होता किन्तु वह स्वभाव से बद्ध नहीं है इसका पहले ही खंडन कर चुके हैं, इसलिए प्रकृति और जीव का भी स्वाभाविक सम्बंध नहीं घटता। **[इत्थं सम्बन्धधर्मी न पुरुषस्तथा न सम्बन्धधर्मिणी प्रकृतिः]** इस प्रकार से सम्बंध धर्म वाला न तो कोई पुरुष है और न ही सम्बंध धर्म वाली प्रकृति है, **[तयोः सम्बन्धधर्मित्वेन प्रमाणं न प्रवर्तते किन्तु बाध्यतेऽतो नैसर्गिकसम्बन्धो यद्वा स्वाभाविकसम्बन्धोऽपि न सांख्यसिद्धान्ते मन्यते]** इसलिए प्रकृति पुरुष को स्वाभाविक सम्बंध वाला धर्मी सिद्ध करने वाला कोई भी प्रमाण सिद्ध नहीं होता अतः स्वाभाविक सम्बंध अथवा नैसर्गिक सम्बंध संख्या सिद्धान्त में नहीं माना जाता। **[विज्ञानभिक्षुभाष्ये 'नाजः' इत्यस्य स्थाने 'नातः' पाठःकल्पितः स न युक्तः]** इस सूत्र के विज्ञानभिक्षु भाष्य में ''नाजः'' के स्थान पर ''नातः'' का पाठ कल्पित किया है जो उचित नहीं है। **[सम्बन्धविचारप्रसंगस्तत्र संज्ञासंज्ञी सम्बन्धः पूर्वं गतः]** यहाँ सम्बंध का विचार प्रसंग चल रहा है और उस संदर्भ में पहले संज्ञासंज्ञी का प्रसंग पूरा

बाधनात् तयोर्धर्मित्वेन सम्बन्धधर्मित्वेन ग्राहकं प्रमाणं बाध्यते। न तथाभूतौ प्रकृतिपुरुषौ प्रमाणं साधयितुं समर्थम्। यतः प्रकृतिस्तु जडाऽचेतना च न सा पुरुषेण सह सम्बन्धस्थापनाय स्वतन्त्रा समर्था च तस्या जडत्वादचेतनत्वात्। पुरुषश्च नित्यशुद्धबुद्धमुक्तस्वभावः प्रकृत्या सह सम्बन्धस्थापनाय नाभिलाषवान् तस्य नित्यशुद्धबुद्धमुक्तस्वभाववत्त्वात्, तथा पुरुषो जीवात्मा न स्वभावतो बद्ध इति पूर्वतः प्रतिपादितत्वात् स्वभावतोऽपि प्रकृत्या सह तस्य सम्बन्धो न घटते। इत्थं सम्बन्धधर्मी न पुरुषस्तथा न सम्बन्धधर्मिणी प्रकृतिः, तयोः सम्बन्धधर्मित्वेन प्रमाणं न प्रवर्तते किन्तु बाध्यतेऽतो नैसर्गिकसम्बन्धो यद्वा स्वाभाविकसम्बन्धोऽपि न सांख्यसिद्धान्ते मन्यते। विज्ञानभिक्षुभाष्ये 'नाजः' इत्यस्य स्थाने 'नातः' पाठःकल्पितः स न युक्तः। सम्बन्धविचारप्रसंगस्तत्र संज्ञासंज्ञी सम्बन्धः पूर्वं गतः, अग्रे समवायसम्बन्धविचारः प्रवर्तिष्यमाणोऽस्ति, अत्र खल्वाजः सम्बन्धो नैसर्गिको नित्यः सम्बन्धो विचार्यते ।।९८।।

समवायसम्बन्धे च -

न समवायोऽस्ति प्रमाणाभावात् ।।९९।।

(समवायः न-अस्ति) सांख्यसिद्धान्ते समवायसम्बन्धस्तत्त्वान्तरं न मन्यते (प्रमाणाभावात्) तत्साधनप्रमाणाभावात् ।।९९।।

हो गया, [**अग्रे समवायसम्बन्धविचारः प्रवर्तिष्यमाणोऽस्ति**] और अगले सूत्र में समवाय सम्बंध का विचार आने ही वाला है, [**अत्र खल्वाजः सम्बन्धो नैसर्गिको नित्यः सम्बन्धो विचार्यते**] इसलिए इस सूत्र में जिस सम्बंध पर चर्चा हो रही है वह यही सम्बंध होना चाहिए स्वाभाविक सम्बन्ध नैसर्गिक सम्बंध नहीं है ।।९८।।

समवाय सम्बंध दो नित्य वस्तुओं में होता है जो हमेशा जुड़ के रहती हैं ।

न समवायोऽस्ति प्रमाणाभावात् ।।९९।।

सूत्रार्थ= समवाय नित्य सम्बन्ध भी सांख्यमत में गुण और गुणी आदि से तत्वांतर तीसरा पदार्थ नहीं है, प्रमाण के अभाव होने से।

[**(समवायः न-अस्ति) सांख्यसिद्धान्ते समवायसम्बन्धस्तत्त्वान्तरं न मन्यते (प्रमाणाभावात्) तत्साधनप्रमाणाभावात्**] सांख्यमत में समवाय सम्बंध तत्वांतर नहीं माना जाता क्योंकि उसको अलग सिद्ध करने वाले साधन प्रमाण के अभाव होने से ।।९९।।

प्रमाण का अभाव कैसे है इसको बताते हैं-

उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा ।।१००।।

सूत्रार्थ= कार्य में कार्यपन और कारण में कारणपन स्वतः सिद्ध होने से समवाय संबंध को कार्य कारण से तत्वांतर सिद्ध करने में ना कोई प्रत्यक्ष प्रमाण है न कोई अनुमान प्रमाण है।

कथं प्रमाणाभाव इत्युच्यते -

उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा ।।१००।।

(उभयत्र-अपि) कार्यकारणयोरपि सांख्यसिद्धान्ते सत्कार्यवादे कारणस्य कार्याभिव्यक्तिधर्मवत्त्वात् कारणत्वं कार्यस्य कारणानुवर्तिधर्मित्वात् कार्यत्वं खलु (अन्यथासिद्धेः) प्रमाणमन्तरा-स्वतः सिद्धं स्वरूपतः सिद्धमस्ति। तस्मात् (प्रत्यक्षम्-अनुमानं वा न) तत्र प्रत्यक्षमथवाऽनुमानं प्रमाणं कार्यकारणाभ्यां भिन्नस्य समवायाख्यस्य तत्त्वान्तरत्वसाधकं न भवति, कार्ये भवति कारणं प्रत्यक्षं कारणाच्च कार्यस्य भवति खल्वनुमानं परन्तु ताभ्यां प्रत्यक्षानुमानाभ्यां तयोः कार्यकारणयोः समवायस्ताभ्यां कार्यकारणाभ्यां तत्त्वान्तरं सांख्यसिद्धान्ते नापेक्ष्यते न मन्यते न सिध्यति ।।१००।।

कारणस्य कारणत्वं कार्यस्य कार्यत्वं भवतु स्वरूपतः, ताभ्यां कार्यकारणाभ्यां तत्त्वान्तरं

[**(उभयत्र-अपि) कार्यकारणयोरपि सांख्यसिद्धान्ते सत्कार्यवादे कारणस्य कार्याभिव्यक्तिधर्मवत्त्वात् कारणत्वं कार्यस्य कारणानुवर्तिधर्मित्वात् कार्यत्वं खलु (अन्यथासिद्धेः) प्रमाणमन्तरा-स्वतः सिद्धं स्वरूपतः सिद्धमस्ति**] कार्य और कारण दोनों का ही सांख्य सिद्धान्त में सत्कार्यवाद (जो कार्य है वह अपने कारण में पहले से विद्यमान होता है) में कोई भी कार्य अपनी अभिव्यक्ति से पूर्व विद्यमान था (सांख्य और योग दोनों सत्कार्यवाद को मानते हैं, न्याय और वैशेषिक का असत्कार्यवाद है- विरोध नहीं है प्रस्तुतिकरण का अंतर है) कारण कार्य की अभिव्यक्ति करता है कार्य कारण की अनुवर्ति करता है उसका यह धर्म है, इस प्रकार से कारण और कार्य दोनों अपने स्वरूप से सिद्ध हैं। [**तस्मात् (प्रत्यक्षम्-अनुमानं वा न) तत्र प्रत्यक्षमथवाऽनुमानं प्रमाणं कार्यकारणाभ्यां भिन्नस्य समवायाख्यस्य तत्त्वान्तरत्वसाधकं न भवति**] इसलिए वहाँ प्रत्यक्ष प्रमाण या अनुमान प्रमाण कार्य कारण से भिन्न समवाय नामक किसी पदार्थ को सिद्ध करने वाला कोई अलग से प्रमाण सिद्ध नहीं होता, [**कार्ये भवति कारणं प्रत्यक्षं कारणाच्च कार्यस्य भवति खल्वनुमानं**] कार्य में कारण प्रत्यक्ष ही दिखता है और कारण से कार्य का अनुमान हो जाता है [**परन्तु ताभ्यां प्रत्यक्षानुमानाभ्यां तयोः कार्यकारणयोः समवायस्ताभ्यां कार्यकारणाभ्यां तत्त्वान्तरं सांख्यसिद्धान्ते नापेक्ष्यते न मन्यते न सिध्यति**] परंतु प्रत्यक्ष अनुमान प्रमाण के माध्यम से कार्य और कारण से जो समवाय संबंध है वो इन दोनों से भिन्न तीसरा पदार्थ है, ये सांख्यदर्शन में स्वीकार नहीं किया जाता क्योंकि प्रमाण से सिद्ध नहीं हो रहा ।।१००।।

[**कारणस्य कारणत्वं कार्यस्य कार्यत्वं भवतु स्वरूपतः**] कारण का कारणत्व और कार्य का कार्यत्व स्वरूप से होवे, [**ताभ्यां कार्यकारणाभ्यां तत्त्वान्तरं समवायसम्बन्धो न स्यात्**] कार्य और कारण समवाय से तीसरी वस्तु अलग न होवे [**परन्तु कारणात् कार्याभिव्यक्तिः क्रियया भवति**] परंतु कारण से

समवायसम्बन्धो न स्यात् परन्तु कारणात् कार्याभिव्यक्तिः क्रियया भवति किं सा क्रियाऽनुमानगम्या मन्तव्या? यथा बीजादङ्कुरस्योत्पादनक्रियाऽनुमेया, इत्याकांक्षायामुच्यते -

नानुमेयत्वमेव क्रियया नेदिष्ठस्य तत्तद्वतोरेवापरोक्षप्रतीतेः ।।१०१।।

(क्रियायाः-अनुमेयत्वम्-एव न) क्रियायाः खल्वनुमेयत्वमेव न मन्तव्यं किन्तु प्रत्यक्षत्वमपि भवति, यतः (नेदिष्ठस्य तत्तद्वतोः-एव-अपरोक्षप्रतीतेः) निकटस्थस्य जनस्य क्रियाक्रियावतोः-क्रियायाःक्रियावतश्चैव प्रत्यक्षज्ञानाद्। यः खलु देशकालदृष्ट्या निकटस्थो भवति स क्रियां क्रियावति प्रत्यक्षमपि पश्यति, गच्छति पुरुषे गमनक्रियां पच्यमाने ह्योदने पचनक्रियां मृत्तिकातो निर्मायमाणे हि घटे निर्माणक्रियां साक्षात्पश्यति हि। देशकालव्यवहिता क्रिया खल्वनुमेया भवति ।।१०१।।

यत्र ह्यनुमेया क्रिया भवति तत्र कार्यात् कारणस्याप्यनुमानम्, तद्यथा -

न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात् ।।१०२।।

(शरीरं पाञ्चभौतिकं न) शरीरं पाञ्चभौतिकं नास्ति, पञ्चभूतेभ्यो नोत्पन्नम् । यतः (बहूनाम्-

---

जो कार्य की अभिव्यक्ति होती है वह क्रिया से होता है (जब तक कारण द्रव्य में क्रिया न हो तो कार्य नहीं बनता) **[किं सा क्रियाऽनुमानगम्या मन्तव्या]** क्या वह क्रिया हो रही है उसे अनुमान से नहीं मानें? **[यथा बीजादङ्कुरस्योत्पादनक्रियाऽनुमेया]** जैसे बीज बोया उसके अंदर अंदर क्रिया उत्पादन की क्रिया होती है वह अनुमान से जानने योग्य है, **इत्याकांक्षायामुच्यते** - इस प्रश्न के उत्तर में कहते हैं-

नानुमेयत्वमेव क्रियया नेदिष्ठस्य तत्तद्वतोरेवापरोक्षप्रतीतेः ।।१०१।।

सूत्रार्थ= क्रिया सब जगह पर अनुमान प्रमाण से ही जानने योग्य नहीं होती, क्रिया और क्रिया वाले पदार्थ के निकट स्थित व्यक्ति को क्रिया का प्रत्यक्ष ज्ञान होने से।

[(क्रियायाः-अनुमेयत्वम्-एव न) क्रियायाः खल्वनुमेयत्वमेव न मन्तव्यं किन्तु प्रत्यक्षत्वमपि भवति] क्रिया सब जगह अनुमेय हो ऐसा नहीं मानना चाहिए किन्तु अनेक स्थानों पर क्रिया प्रत्यक्ष भी होती है, **[यतः (नेदिष्ठस्य तत्तद्वतोः-एव-अपरोक्षप्रतीतेः) निकटस्थस्य जनस्य क्रियाक्रियावतोः-क्रियायाःक्रियावतश्चैव प्रत्यक्षज्ञानाद्]** निकट में विद्यमान जो मनुष्य है जहां-जहां क्रिया चल रही है उस क्रिया और क्रिया वाले पदार्थ के निकट जो व्यक्ति उपस्थित है वह क्रिया को प्रत्यक्ष देखता है। **[यः खलु देशकालदृष्ट्या निकटस्थो भवति स क्रियां क्रियावति प्रत्यक्षमपि पश्यति]** जो देश काल की दृष्टि से निकटस्थ होता है (जहां क्रिया हो रही है) ऐसे में वह क्रिया को भी देखता है और क्रिया वाले पदार्थ में प्रत्यक्ष भी देखता है, **[गच्छति पुरुषे गमनक्रियां पच्यमाने ह्योदने पाचनक्रियां मृत्तिकातो निर्माणमाणे हि घटे निर्माणक्रियां साक्षात्पश्यति हि]** व्यक्ति के चलने में गमन क्रिया दिखती है, भात पकाने में पकाने की क्रिया दिखती है ऐसे ही मिट्टी से घड़ा बनाते समय क्रिया प्रत्यक्ष होती है, इस प्रकार से निकटस्थ व्यक्ति साक्षात क्रिया को देखता है। **[देशकालव्यवहिता क्रिया खल्वनुमेया भवति]** देश काल से छिपी हुई जो क्रिया होती है वह अनुमेंय होती है ।।१०१।।

उपादानयोगात्) बहूनां भूतानामेकस्मिन् कार्ये कार्याभिव्यक्तौ खलूपादानत्वयोगः परिणम्यमानयुक्तता नास्ति। अत्र वक्तव्यम् - तृतीयाध्याये ''पाञ्चभौतिको देहः'' १७, चातुर्भौतिकमित्येके १८, ऐकभौतिकमित्यपरे १९ ''इत्यत्र सूत्रत्रये शरीरस्य कारणविचारणायां चातुर्भौतिकविचारे 'एके' ऐकभौतिकविचारे 'अपरे' शब्दाभ्यां भिन्नमतप्रकाशनं कृतं किन्तु ''पाञ्चभौतिको देहः'' १० इति सूत्रे नान्यमतप्रकाशनसंकेतः, इत्थं तु खलु तत्र पाञ्चभौतिकं शरीरमिति सांख्यमतं मनाक् कल्पयितुं शक्यते परन्तु ''न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्'' अत्र प्रस्तुतसूत्रे पाञ्चभौतिकत्वं शरीरस्य निराक्रियते पुनः सांख्यमतं शरीरस्योपादानत्वे किमिति प्रश्नः समुपतिष्ठते तत्र चातुर्भौतिकत्वं तथैकभौतिकत्वं तु न

यत्र ह्यनुमेया क्रिया भवति तत्र कार्यात् कारणस्याप्यनुमानम्, तद्यथा - जहां क्रिया अनुमान से जानने योग्य हो वहाँ कार्य से कारण का भी अनुमान हो जाता है। जैसे कि-

न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात् ।।१०२।।

सूत्रार्थ=शरीर पाँच महाभूतों से समान मात्रा में नहीं बना है बहुत से कारण द्रव्य समान मात्रा में मिलकर किसी कार्य द्रव्य को ठीक प्रकार से उत्पन्न करने में असमर्थ होने से।

[**(शरीरं पाञ्चभौतिकं न) शरीरं पाञ्चभौतिकं नास्ति, पञ्चभूतेभ्यो नोत्पन्नम्**] शरीर पंचभौतिक नहीं है, पाँच महाभूतों से उत्पन्न नहीं हुआ।[**यतः क्योंकि (बहूनाम्-उपादानयोगात्) बहूनां भूतानामेकस्मिन् कार्ये कार्याभिव्यक्तौ खलूपादानत्वयोगः परिणम्यमानयुक्तता नास्ति**] पाँच भूत समान मात्र में उपादान नहीं हैं। अत्र वक्तव्यम् यहाँ समीक्षा कर रहे हैं [**- तृतीयाध्याये ''पाञ्चभौतिको देहः'' १७, चातुर्भौतिकमित्येके १८, ऐकभौतिकमित्यपरे १९ ''इत्यत्र सूत्रत्रये शरीरस्य कारणविचारणायां चातुर्भौतिकविचारे 'एके' ऐकभौतिकविचारे 'अपरे' शब्दाभ्यां भिन्नमतप्रकाशनं कृतं**] तृतीय अध्याय में जो तीन सूत्र आए थे, इन तीन सूत्रों में जब शरीर के कारणों का विचार चल रहा था ''कि शरीर कितने और किन-किन कारणों से बना है'' उस प्रसंग में जब ये कहा था कि ''चातुर्भौतिकमित्येके'' कुछ लोग ऐसा मानते हैं, ''ऐकभौतिकमित्यपरे'' और कुछ ऐसा भी मानते हैं, ये अन्यों का मत प्रकाशित किया [**किन्तु ''पाञ्चभौतिको देहः'' १० इति सूत्रे नान्यमतप्रकाशनसंकेतः**] किन्तु ''पाञ्चभौतिको देहः'' इस सूत्र में किसी अन्य के मत प्रकाशन नहीं है, [**इत्थं तु खलु तत्र पाञ्चभौतिकं शरीरमिति सांख्यमतं मनाक् कल्पयितुं शक्यते**] इस प्रकार से वहाँ पंचभौतिक है शरीर ये सांख्य का अपना मत है, ये स्वाभाविक रूप से कल्पित किया जा सकता है [**परन्तु ''न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्'' अत्र प्रस्तुतसूत्रे पाञ्चभौतिकत्वं शरीरस्य निराक्रियते**] परंतु प्रस्तुत प्रसंग में पंचभौतिक शरीर का खंडन किया जा रहा है [**पुनः सांख्यमतं शरीरस्योपादानत्वे किमिति प्रश्नः समुपतिष्ठते**] फिर सांख्य का अपना मत क्या है! ये प्रश्न उपस्थित होता है [**तत्र चातुर्भौतिकत्वं तथैकभौतिकत्वं तु न सांख्यमतं कल्पयितुं युज्यते**] इस प्रकरण में शरीर चार भूतों से बना है एक भूत से बना है ये तो सांख्य का अपना मत कल्पित नहीं किया जा सकता है [**'एके' 'अपरे' शब्दाभ्यां भिन्नमतप्रदर्शनात्**]'एके''अपरे' शब्दो से भिन्न मत को प्रदर्शित किया है।[**शरीरमनेकभूतेभ्यो निष्पन्नमिति**

सांख्यमतं कल्पयितुं युज्यते 'एके' 'अपरे' शब्दाभ्यां भिन्नमतप्रदर्शनात्। शरीरमनेकभूतेभ्यो निष्पन्नमिति सांख्यमतं तु ध्वन्यते ''न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः'' (सांख्य० ३.२०) यथा विज्ञानभिक्षुभाष्येऽपि ''भूतेषु पृथक् पृथक् कृतेषु चैतन्यादर्शनाद् भौतिकस्य देहस्य न स्वाभाविकं चैतन्यम्''। सूत्रे 'प्रत्येकादृष्टेः' पदेन शरीरमनैकभौतिकं तु सिद्धं भवति हि तत्र। अत्रोच्यते न पाञ्चभौतिकं शरीरम्। उभयप्रकरणालोचनया शरीरस्य कारणविषये सांख्यमतमस्तीदं यत्-शरीरमभिनिष्पन्नं तु पञ्चभूतेभ्यः ''पाञ्चभौतिको देहः'' इति कथनात् परन्तु तत्र पञ्चसु भूतेषु पादानत्वं परिणम्यमानत्वं न पञ्चभूतानाम् ''बहूनामुपादानत्वायोगात्'' तर्ह्येकस्य भूतस्योपादानत्वं परिणम्यमानत्वं भवति शरीररूपे कस्यैकस्येति प्रश्ने तु पृथिव्या एवोपादनत्वं परिणम्यमानत्वमस्ति तत्रान्येषां तूपष्टम्भकत्वं सहकारित्वमनिवार्यमेवेति सांख्यमतम्। उक्तं यथाऽतोग्रे हि ''सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत्'' (११२) पृथिवी ह्यसाधारणकारणं

सांख्यमतं तु ध्वन्यते] शरीर अनेक भूतों से उत्पन्न हुआ है ये तो दूसरे स्त्रोत से पता चलता है **[''न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः']** शरीर में जो चेतनता है वह स्वाभाविक नहीं है प्रत्येक भूत को जाँचने से' **[(सांख्य० ३.२०) यथा विज्ञानभिक्षुभाष्येऽपि ''भूतेषु पृथक् पृथक् कृतेषु चैतन्यादर्शनाद्॒ भौतिकस्य देहस्य न स्वाभाविकं चैतन्यम्'']** जैसे विज्ञानभिक्षु भाष्य में भी ये कहा गया है -भूतो को अलग अलग जाँचने पर चेतनता दिखाई नहीं दी। सब में चेतनता का अभाव होने से भौतिक देह में स्वाभाविक चेतना नहीं है। **[सूत्रे 'प्रत्येकादृष्टेः' पदेन शरीरमनैकभौतिकं तु सिद्धं भवति हि तत्र]** उस सूत्र में' प्रत्येकादृष्टेः' इस शब्द से ''शरीर अनेक भूतों से बना है'' ये तो सिद्ध हो ही रहा है। **[अत्रोच्यते न पाञ्चभौतिकं शरीरम्]** यहाँ कहा कि पाँच भूतो से शरीर नहीं बना। **[उभयप्रकरणालोचनया शरीरस्य कारणविषये सांख्यमतमस्तीदं यत्-शरीरमभिनिष्पन्नं तु पञ्चभूतेभ्यः ''पाञ्चभौतिको देहः'' इति कथनात्]** दोनों प्रकरणों को देखकर शरीर उत्पन्न तो हुआ है पंचभूतों से ये तो तीसरे अध्याय से सिद्ध हो रहा है **[परन्तु तत्र पञ्चसु भूतेषु पादानत्वं परिणम्यमानत्वं न पञ्चभूतानाम्]** परंतु वहाँ पांचों भूतों का उपादान होना और उसका परिणाम होना ये सटीक नहीं लगता **''बहूनामुपादानत्वायोगात्''** इस सूत्र में ये कहा कि सारे के सारे उपादान नहीं हो सकते **[तर्ह्येकस्य भूतस्योपादानत्वं परिणम्यमानत्वं भवति शरीररूपे कस्यैकस्येति प्रश्ने तु पृथिव्या एवोपादनत्वं परिणम्यमानत्वमस्ति]** फिर एक भूत का ही उपादान होना चाहिए उसी के परिणाम से ये सारा शरीर बना है । शरीर में किस एक भूत का उपादानत्व है? पृथ्वी का ही उपादानत्व सिद्ध होता है उसी का ये परिणाम है **[तत्रान्येषां तूपष्टम्भकत्वं सहकारित्वमनिवार्यमेंवेति सांख्यमतम्]** वहाँ अन्य भूतों का थोड़ा-थोड़ा सहयोग है और मुख्य उपादानत्व एक है यह सांख्य का मत है। **[उक्तं यथाऽतोग्रे हि''सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत्'']** जैसा कि यहाँ आगे भी कहा है- सभी शरीरों में पृथ्वी उपादान है, विशेष होने से शेष कथन पूर्व के समान है **[(११२) पृथिवी ह्यसाधारणकारणं विशेषकारणं प्रधानकारणमुपादानकारणमन्यानि भूतानि तु साधारणकारणानि गौणकारणानि सहकारिकारणानीत्यर्थः]** पृथ्वी मुख्य कारण है असाधारण कारण है विशेष कारण है प्रधान कारण है उपादान कारण है अन्य साधारण सहयोगी कारण हैं, **[यथा घटस्योपादानकारणं मृत्तिका तत्र पिण्डीकरणे जलम्]** जैसे घड़े का उपादान कारण मिट्टी है उसको पिंडी बनाने में सहयोगी जल है, **पाकेऽग्निः** घड़े को पकाने के लिए अग्नि का सहयोग,

विशेषकारणं प्रधानकारणमुपादानकारणमन्यानि भूतानि तु साधारणकारणानि गौणकारणानि सहकारिकारणानीत्यर्थः, यथा घटस्योपादानकारणं मृत्तिका तत्र पिण्डीकरणे जलम्, पाकेऽग्निः, गतिव्यवहारे वायुः, अवकाशप्रदाने चाकाशः सहकारिकारणानि सन्ति। आहारनियमादपि तथैव प्रतीयते शरीरस्य स्थविष्ठत्वे स्थिरत्वे वृद्धौ च पार्थिव आहार एव प्राधान्येनापेक्ष्यते जलाग्निवाय्वाकाशानां सम्पर्कोऽपि सूक्ष्मभावेन निमित्तं भवति ।।१०२।।

बाह्यस्थूलशरीरान्तरे सूक्ष्मशरीरमप्यस्तीत्याह -

न स्थूलमिति नियम आतिवाहिकस्यापि विद्यमानत्वात् ।।१०३।।

(स्थूलम्-इति नियमः-न) स्थूलशरीरमेवास्तीति नियमः सिद्धान्तो न, यतः (आतिवाहिकस्य-अपि विद्यमानत्वात्) अतिवाहे-देहाद् देहान्तरप्राप्तौ निमित्तं यत् तदातिवाहिकं सूक्ष्मशरीरं तस्यापि विद्यमानत्वमस्ति, नहि निराश्रयो जीवात्मा देहाद् देहान्तरं गन्तुमर्हः। उक्तं लिंगशरीरम् ''तदेव सक्तः सह

गतिव्यवहारे वायुः उठान लाना ले जाना में गति का व्यवहार वायु से है, [**अवकाशप्रदाने चाकाशः सहकारिकारणानि सन्ति**] घड़े को टिकाने के लिए आकाश का सहयोग होता है। [**आहारनियमादपि तथैव प्रतीयते शरीरस्य स्थविष्ठत्वे स्थिरत्वे वृद्धौ च पार्थिव आहार एव प्राधान्येनापेक्ष्यते**] शरीर को आहार आदि का भी सहयोग प्रतीत होता है उसे स्थूल बनाने में स्थिर रखने में वृद्धि कराने पार्थिव आहार की ही प्रधानता होती है [**जलाग्निवाय्वाकाशानां सम्पर्कोऽपि सूक्ष्मभावेन निमित्तं भवति**] जल, अग्नि, वायु, आकाश आदि का संपर्क सहयोग सूक्ष्म रूप से होता है। उसका कोई विरोध नहीं है।।१०२।।

बाह्य स्थूल शरीर के अन्दर एक सूक्ष्म शरीर भी है। इस बात को अगले सूत्र से कहते हैं-

न स्थूलमिति नियम आतिवाहिकस्यापि विद्यमानत्वात् ।।१०३।।

सूत्रार्थ=केवल स्थूल शरीर ही हो ऐसा नियम नहीं है, सूक्ष्म शरीर के भी विद्यमान रहने से।

[**(स्थूलम्-इति नियमः-न) स्थूलशरीरमेंवास्तीति नियमः सिद्धान्तो न**] स्थूल शरीर ही हो ऐसा कोई नियम व सिद्धान्त नहीं है, [**यतः क्योंकि (आतिवाहिकस्य-अपि विद्यमानत्वात्) अतिवाहे-देहाद् देहान्तरप्राप्तौ निमित्तं यत् तदातिवाहिकं सूक्ष्मशरीरं तस्यापि विद्यमानत्वमस्ति**] एक शरीर को छोडकर दूसरे शरीर की प्राप्ति में जो निमित्त बनता है वह आतिवाहिक (सूक्ष्म शरीर) है। वह सूक्ष्म शरीर की भी विद्यमानता है, [**नहि निराश्रयो जीवात्मा देहाद् देहान्तरं गन्तुमर्हः**] बिना आश्रय के आधार के जीवात्मा एक शरीर से दूसरे शरीर तक नहीं जा सकता। [**उक्तं लिंगशरीरम्** शास्त्रों में लिंग (सूक्ष्म) शरीर की चर्चा आती है- **''तदेव सक्तः सह कर्मणैति लिंग मनो यत्र निषक्तमस्य'' (बृह० ४.४.६)** ''उसी से आसक्त हुआ जुड़ा हुआ कमो५ के साथ जाता है जो लिंग शरीर रूपी मन है वह जिस वस्तु में जीवात्मा का मन आसक्त है वहाँ ले जाता है''।।१०३।।

कर्मणैति लिंग मनो यत्र निषक्तमस्य'' (बृह० ४.४.६) ।।१०३।।

शरीरे हीन्द्रियाणि सन्ति, तानि प्राप्तं स्वस्वविषयं प्रकाशयन्ति यद्वाऽप्राप्तं प्रकाशयन्ति, दृश्यते खलूभयं प्राप्तप्रकाशनमप्राप्तप्रकाशनं च तेषाम्। यथा श्रोत्रं प्राप्तं समीपस्थं शब्दमपि प्रकाशयति दूरस्थमप्राप्तमपि प्रकाशयति, तथा नेत्रं प्राप्तं समीपस्थं रूपमपि प्रकाशयति दूरस्थमप्राप्तमाकाशीयं नक्षत्रतारकमपि प्रकाशयति तदत्र कः सिद्धान्तः। अत्रोच्यते –

नाप्राप्तप्रकाशकत्वमिन्द्रियाणामप्राप्तेः सर्वप्राप्तेर्वा ।।१०४।।

(इन्द्रियाणाम्-अप्राप्तप्रकाशकत्वं न) इन्द्रियाणि न ह्यप्राप्तं प्रकाशयन्ति, यच्चाप्राप्तं दूरस्थं शब्दं रूपं वा प्रकाशयन्तीति प्रतीयते तन्न तथा, किन्तु तदपि विषयजातं प्राप्तमेव प्रकाशयन्तीति निश्चयः,

---

[**शरीरे हीन्द्रियाणि सन्ति, तानि प्राप्तं स्वस्वविषयं प्रकाशयन्ति यद्वाऽप्राप्तं प्रकाशयन्ति** शरीर में इंद्रियाँ हैं, वे अपने-अपने विषय का ज्ञान कराती हैं, वे इंद्रियाँ क्या बिना जुड़े ही ज्ञान प्राप्त कराती हैं, **दृश्यते खलूभयं प्राप्तप्रकाशनमप्राप्तप्रकाशनं च तेषाम्**] पूर्वपक्षी कहता है- दोनों ही प्रकार से देखा जाता है कभी इंद्रिया विषयों से जुड़कर ज्ञान कराती है और कभी अपने विषयों से जुड़े बिना ही ज्ञान प्राप्त कराती हैं। [**यथा श्रोत्रं प्राप्तं समीपस्थं शब्दमपि प्रकाशयति दूरस्थमप्राप्तमपि प्रकाशयति**] जैसे कान समीप वाले शब्दों का भी ज्ञान कराता है और दूर के शब्द का भी ज्ञान कराता है, [**तथा नेत्रं प्राप्तं समीपस्थं रूपमपि प्रकाशयति दूरस्थमप्राप्तमाकाशीयं नक्षत्रतारकमपि प्रकाशयति तदत्र कः सिद्धान्तः**] वैसे ही नेत्र समीप के दृश्यों को भी दिखाता है और दूर स्थित आकाश में नक्षत्र तारागण को भी दिखाता है। इसमें सिद्धान्त क्या है?। **अत्रोच्यते** - इसके उत्तर में कहते हैं-

नाप्राप्तप्रकाशकत्वमिन्द्रियाणामप्राप्तेः सर्वप्राप्तेर्वा ।।१०४।।

सूत्रार्थ= इंद्रियाँ अपने विषयों से संबंद्ध हुए बिना विषयों का ज्ञान नहीं कराती हैं अन्यथा किसी भी विषय का ज्ञान न हो या सभी विषयों का ज्ञान हो जाए।

[**(इन्द्रियाणाम्-अप्राप्तप्रकाशकत्वं न) इन्द्रियाणि न ह्यप्राप्तं प्रकाशयन्ति**] सिद्धांती कहता है- जो इंद्रियों से अप्राप्त विषय है उनका प्रकाश नहीं कराती, [**यच्चाप्राप्तं दूरस्थं शब्दं रूपं वा प्रकाशयन्तीति प्रतीयते तन्न**] तथा और जो अप्राप्त दूरस्थ शब्द और रूप है जो आपको प्रकाशित हो रहा था वह ऐसा नहीं है, [**किन्तु तदपि विषयजातं प्राप्तमेव प्रकाशयन्तीति निश्चयः**] किन्तु विना विषयों के अप्राप्ति के कोई भी विषय का प्रकाश नहीं होता, [**इन्द्रियाणामतीन्द्रियत्वात् तदुक्तं पूर्वम्**] इंद्रियों के अतींद्रिय होने से ऐसा पूर्व ही कहा था **''अतीन्द्रियमिन्द्रियं...'' (सांख्य० २.२३)** (ऋषियों का विचार सिद्धान्त यह है नेत्र इंद्रिय की किरणें विषय तक जाती है उसका चित्र रूपदर्शन करके आती है और हमें मन के माध्यम से ज्ञान कराती है आधुनिक विज्ञान की मान्यता है- बाहर से लाइट किरण आती हैं आँख के

इन्द्रियाणामतीन्द्रियत्वात् तदुक्तं पूर्वम् ''अतीन्द्रियमिन्द्रियं...''(सांख्य० २.२३) न हि शरीरसंसक्तानि गोलकानीन्द्रियाणि, तस्मात् प्राप्तं हि विषयं प्रकाशयन्तीन्द्रियाणि तेषां शक्तिस्वरूपत्वात् (अप्राप्तेः सर्वप्राप्तेः वा) यदि प्राप्तं न प्रकाशयेयुरिन्द्रियाणि तदा कस्मिंश्चिद् देशे काले वा प्राप्तस्य शब्दस्य रूपादिकस्य वा तस्मिन् देशे काले चाप्राप्तिर्भवेत्, भवति हि प्राप्तस्य प्राप्तिः। अथवा सर्वप्राप्तिर्भवेत् सर्वस्मिन् देशे काले च सर्वस्य विषयस्य प्राप्तिर्भवेत्, न च तथा भवति। तस्मात् प्राप्तप्राकाशकत्वमिन्द्रियाणआमिति सिद्धान्तः ।।१०४।।

ननु चेदिन्द्रियाणि प्राप्तं प्रकाशयन्ति तर्हि चक्षुस्तु तैजसं भवेद् यद् दूरस्थं नक्षत्रादिकं प्रति सर्पति तत्प्राप्तुं तैजस एव पदार्थ किरणरूपेण दूरमपसरति पुनराहंकारिकत्वमिन्द्रियाणामिति कथम्। अत्रोच्यते -

---

निकट फिर आँख देखती है फिर मस्तिष्क तक पहुंचाती फिर ज्ञान होता है) [**न हि शरीरसंसक्तानि गोलकानीन्द्रियाणि**] शरीर के साथ जो जुड़े है वह इंद्रियों के गोलक हैं इंद्रिय नहीं हैं इंद्रिय तो गोलक के अन्दर होती हैं, [**तस्मात् प्राप्तं हि विषयं प्रकाशयन्तीन्द्रियाणि तेषां शक्तिस्वरूपत्वात्**] इसलिए इंद्रिय अपने विषय को प्राप्त होती हैं उनकी शक्ति अधिक है उससे वह वस्तु अथवा विषय के स्वरूप का ज्ञान कराती हैं [**(अप्राप्तेः सर्वप्राप्तेः वा) यदि प्राप्तं न प्रकाशयेयुरिन्द्रियाणि तदा कस्मिंश्चिद् देशे काले वा प्राप्तस्य शब्दस्य रूपादिकस्य वा तस्मिन् देशे काले चाप्राप्तिर्भवेत्**] यदि प्राप्त का प्रकाश इंद्रियाँ न करें तब किसी भी देश व काल में कान में आए हुए शब्द का या आँख तक पहुंचे रूप का उस देश या काल में ज्ञान प्राप्ति नहीं होगा, [**भवति हि प्राप्तस्य प्राप्तिः**] इंद्रियों का जिन जिन से संबंध जुड़ेगा उन उनका ज्ञान होता है। [**अथवा सर्वप्राप्तिर्भवेत् सर्वस्मिन् देशे काले च सर्वस्य विषयस्य प्राप्तिर्भवेत्, न च तथा भवति**] यदि बिना विषयों से जुड़े किसी भी विषय का ज्ञान मान लिया जाए तो सभी देशों सभी कालों में हर वस्तु दिखेगी प्रत्येक विषय का प्रत्यक्ष होने लग जाएगा,और ऐसा तो होता नहीं। [**तस्मात् प्राप्तप्राकाशकत्वमिन्द्रियणामिति सिद्धान्तः**] इसलिए इंद्रियाँ जिन जिन विषयों से जुड़ेंगी उन्हीं-उन्हीं विषयों का ज्ञान कराएंगी जिनसे नहीं जुड़ेंगी उनका ज्ञान नहीं कराएंगी यही सिद्धान्त है ।।१०४।।

प्रश्न है यदि इंद्रियाँ अपने विषय से सम्बद्ध हो कर के ही ज्ञान प्राप्त कराती हैं, फिर तो चक्षु आग्नेय होना चाहिए क्योंकि वह दूर नक्षत्र आदि तक सरकेगा फिर वापिस आकर ज्ञान प्राप्त कराएगा तेजस का (ये आग्नेय तत्व होना चक्षु क्योंकि अग्नि फैलती है), क्योंकि तेजस पदार्थ जो आग्नेय तत्व है वह किरण के रूप में दूर तक फैलता है। फिर इंद्रियाँ अहंकार से बनी हैं ये कथन कैसे हुआ? इस पर कहते हैं-

न तेजोऽपसर्पणात् तैजसं चक्षुर्वृत्तितस्तत्सिद्धेः ।।१०५।।

सूत्रार्थ= अग्नि के गतिशील होने से चक्षु इंद्रियो को भी आग्नेय =अग्नि से उत्पन्न (तेजस) नहीं मानना चाहिए। चक्षु इंद्रियों की गति अपनी शक्ति से होती है।

[**(तेजोऽपसर्पणात्) तेजसोऽपसर्पणं तेजोऽपसर्पणमिति षष्ठीसमासः**] ये षष्ठी तत्पुरुष समास है, ~~अग्नि का फैलना~~ दूर तक जाना। [**तेजोविषयकमपसर्पणं भवति**] तेज का विषय है फैलना, [**अपसर्पणं**

न तेजोऽपसर्पणात् तैजसं चक्षुर्वृत्तितस्तत्सिद्धेः ।।१०५।।

(तेजोऽपसर्पणात्) तेजसोऽपसर्पणं तेजोऽपसर्पणमिति षष्ठीसमासः। तेजोविषयकमपसर्पणं भवति, अपसर्पणं तेजो धर्मस्तस्मात् (तैजसं चक्षुः-न) चक्षुस्तैजसं न मन्तव्यं यतः (वृत्तितः-तत्सिद्धेः) चक्षुषो वृत्तिद्वारेण दूरस्थं विषयं प्रत्यपसर्पणं भवति। भवन्ति हीन्द्रियाणां वृत्तयो याभिरिन्द्रियाणि दूरस्थमपि विषयं प्राप्नुवन्ति तत्समीपं सर्पन्ति, मनोऽपि त्वतैजसं सद् दूरमपसर्पति वृत्तिद्वारेण, सांख्यसिद्धान्ते मनोवदिन्द्रियाणामपि वृत्तयः स्वीक्रियन्ते, यथा मनसो वृत्तयस्तथेन्द्रियाणामपि वृत्तयो भवन्तीत्युक्तं हि पूर्वम् ''क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः'' (सांख्य० २.३२) ।।१०५।।

इन्द्रियाणां वृत्तिभिर्विषयप्राप्तिरुच्यते, वृत्तिसिद्धिः कथं भवतीत्युच्यते -

प्राप्तार्थप्रकाशलिंगाद् वृत्तिसिद्धिः ।।१०६।।

(प्राप्तार्थप्रकाशलिंगात्-वृत्तिसिद्धिः) प्राप्तमर्थं प्रकाशयन्ति ज्ञापयन्तीति लिंगमनुमानं वृत्तिसिद्धौ

तेजो धर्मस्तस्मात् (तैजसं चक्षुः-न) चक्षुस्तैजसं न मन्तव्यं] फैलना अग्नि का धर्म है इतने मात्र से ये भी नहीं समझ लेना चाहिए कि चक्षु भी तेजस है **[यतः (वृत्तितः-तत्सिद्धेः) चक्षुषो वृत्तिद्वारेण दूरस्थं विषयं प्रत्यपसर्पणं भवति]** क्योंकि चक्षु वृत्ति के द्वारा दूर तक के विषय तक फैलता है। **[भवन्ति हीन्द्रियाणां वृत्तयो याभिरिन्द्रियाणि दूरस्थमपि विषयं प्राप्नुवन्ति तत्समीपं सर्पन्ति]** इंद्रियों की अपनी-अपनी वृत्तियाँ होती हैं उन व्रत्तियों के द्वारा इंद्रियाँ दूर-दूर तक फैलती है और विषय को प्राप्त करती हैं उसके पास तक सरक के जाती हैं, **[मनोऽपि त्वतैजसं सद् दूरमपसर्पति वृत्तिद्वारेण]** मन भी अतेजस होता हुआ वृत्ति के द्वारा अलग अलग इंद्रियों के समीप जाता ज्ञान प्राप्त करता है, **[सांख्यसिद्धान्ते मनोवदिन्द्रियाणामपि वृत्तयः स्वीक्रियन्ते]** सांख्यदर्शन के सिद्धान्त में मन के समान इंद्रियों की भी वृत्तियाँ स्वीकार की जाती हैं (यहाँ इंद्रियों की वृत्ति से अर्थ है इंद्रियों का स्वभाव-शक्ति), **[यथा मनसो वृत्तयस्तथेन्द्रियाणामपि वृत्तयो भवन्तीत्युक्तं हि पूर्वम् ''क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः'' (सांख्य० २.३२)]** जैसे मन की पाँच व्रत्तियाँ होती हैं ऐसे ही इंद्रियों की भी अपनी अपनी व्रत्तियाँ होती हैं, जैसा कि दूसरे अध्याय में कहा ही था- इंद्रियों कि वृत्तियाँ है वह क्रम से भी होती हैं और अक्रम से भी।।१०५।।

विषयों का प्राप्ति इंद्रियों की वृत्ति से होती है। इंद्रियों की वृत्ति सिद्धि कैसे होती है? फैलती कैसे हैं? इस विषय को कहते हैं-

प्राप्तार्थप्रकाशलिंगाद् वृत्तिसिद्धिः ।।१०६।।

सूत्रार्थ= क्योंकि इंद्रियां विषय से सम्बद्ध होकर के ही ज्ञान प्राप्त कराती हैं इस प्रमाण से चंद्रमा का ज्ञान यहीं बैठे-बैठे हो रहा है इससे सिद्ध हो रहा है चंद्रमा और चक्षु इंद्रियों का सन्निकर्ष हो चुका है।

[(प्राप्तार्थप्रकाशलिंगात्-वृत्तिसिद्धिः) प्राप्तमर्थं प्रकाशयन्ति ज्ञापयन्तीति लिंगमनुमानं वृत्तिसिद्धौ यन्त्रस्य तारमिव] इंद्रियाँ प्राप्त हुए विषय का ही ज्ञान प्राप्त कराती हैं ये लिंग का अनुमान प्रमाण है वृत्ति सिद्धि में, जैसे यंत्र का तार से जुड़ाव-मेल-सम्बद्ध होता है।।१०६।।

यन्त्रस्य तारमिव ।।१०६।।

अथ किंस्वरूपा सेत्युच्यते -

भागगुणाभ्यां तत्त्वान्तरं वृत्तिः सम्बन्धार्थं सर्पतीति ।।१०७।।

(भागगुणाभ्यां तत्त्वान्तरं वृत्तिः) सा खल्विन्द्रियवृत्तिः, इन्द्रियस्य न भागोंऽशो न च गुणो रूपादिवत् किन्तु भागगुणाभ्यां वस्त्वन्तरं भिन्नं वस्तु। यतः (सम्बन्धार्थं सर्पति-इति) दूरस्थमपि विषयं प्रति सम्बन्धार्थं सर्पतीति हेतोः, इन्द्रियं विहाय तद्भागो गुणो वा न दूरं सर्पितुं शक्तस्तत्स्थत्वाद् वृत्तिस्तु विद्युत्तरंगवद् दूरमपि सर्पति ।।१०७।।

ननु वृत्तिरिन्द्रियाणां भागगुणाभ्यां तत्त्वान्तरं तर्हि सा विशिष्टा क्रिया हि स्यात् पुनः क्रिया भवति द्रव्याश्रिता द्रव्ये हि व्यापृता न ततो बहिर्गमनशीलेति विप्रतिपत्तिर्निराक्रियते -

न द्रव्ये नियमस्तद्योगात् ।।१०८।।

अब वह वृत्ति कैसे स्वरूप वाली होती है। इस विषय में कहते हैं-

भागगुणाभ्यां तत्त्वान्तरं वृत्तिः सम्बन्धार्थं सर्पतीति ।।१०७।।

सूत्रार्थ=वृत्ति इंद्रियों का भाग और गुण दोनों ही नहीं है अपितु इनसे भिन्न स्वरूप वाली है। विषय से सम्बंध जोड़ने के लिए सरकती फैलती है।

[(भागगुणाभ्यां तत्त्वान्तरं वृत्तिः) सा खल्विन्द्रियवृत्तिः, इन्द्रियस्य न भागोंऽशो न च गुणो रूपादिवत् किन्तु भागगुणाभ्यां वस्त्वन्तरं भिन्नं वस्तु] वह जो इंद्रिय वृत्ति है, वह इंद्रिय का कोई भाग या अंश नहीं है और न ही रूपादि गुण है, किन्तु भाग और गुण इन दोनों से भिन्न वस्तु है। **[यतः (सम्बन्धार्थं सर्पति-इति) दूरस्थमपि विषयं प्रति सम्बन्धार्थं सर्पतीति हेतोः]** क्योंकि वह वृत्ति दूर स्थित विषय के साथ सम्बंध जोड़ने जाती है, **[इन्द्रियं विहाय तद्भागो गुणो वा न दूरं सर्पितुं शक्तस्तत्स्थत्वाद् वृत्तिस्तु विद्युत्तरंगवद् दूरमपि सर्पति]** इंद्रिय का भाग अंश या गुण इंद्रिय को छोड़कर दूर नहीं जा सकती, वृत्ति तो विद्युत तरंग के समान दूर जाती है जब दूर जाती है तो गुण अकेला नहीं जाता द्रव्य भी जाता है ।।१०७।।

प्रश्न है कि वृत्ति इंद्रिय के भाग और गुण दोनों से अलग स्वरूप वाली है फिर वह विशेष क्रिया वाली होनी चाहिए? जो क्रिया होती है वह द्रव्य में आश्रित होती है संयुक्त होती है, उससे बाहर तो वह जाती नहीं। इससे विरोधाभास आता है। इसका निराकरण करते हैं-

न द्रव्ये नियमस्तद्योगात् ।।१०८।।

सूत्रार्थ= चक्षु द्रव्य में यह नियम है कि वह सदा एक ही स्थान पर रहे उसमें संकोच विकास आदि धर्म का योग होने से वह दूर भी जाता है।

(इस सूत्र का भाष्य ठीक नहीं है)

(द्रव्ये नियमः-न) द्रव्ये हि क्रियाऽवतिष्ठेतेति नियमो नास्ति, द्रव्येऽप्यवतिष्ठते व्याप्रियते क्रिया । किन्तु (तद्योगात्) द्रव्ययोगात् तद्बहिरपि दूरं क्रियाऽपसर्पति यथा सूर्यस्य तापक्रिया सूर्येऽपि स्थिता सती दूरं दूरतरं दूरतमं चापसर्पति तथेन्द्रियाणां वृत्तिरूपा विशिष्टा क्रिया दूरमप्यपसर्पति ।। अन्यो व्याख्यामार्गः - (द्रव्ये नियमः-न) क्रियाया द्रव्ये नियमो नास्ति, भवतु द्रव्ये क्रिया परन्तु यत्र द्रव्यत्वं तत्रैव क्रियेति नियमो न, किन्तु (तद्योगात्) क्रियायोगाद् द्रव्यत्वं भवति तेन क्रिया द्रव्यात् पृथगपि व्याप्रियते हि, उदाहरणं तु पूर्ववदेव यथा वाऽग्नेर्धूमगतिस्ततः पृथगपि प्रतीयते ।। अथवा -

द्रव्ये हि क्रिया भवति तद्वृत्तौ कथमपसर्पणक्रियेत्यत्रोच्यते -

(द्रव्ये नियमः-न) द्रव्ये क्रियाया नियमो न, भवतु द्रव्येऽपि क्रिया परन्तु (तद्योगात्) क्रियायोगाद् वृत्तौ विद्युत्तरंगवत् क्रियेति निश्चयः, यतो दूरस्थमपि विषयं प्राप्नोतीन्द्रियं स्ववृत्त्या क्रियावत्या तस्मान्न दोषः ।।१०८।।

इस तरह की जो इंद्रियाँ है, इनके विषय में कहते हैं-

न देशभेदेऽप्यन्योपादानताऽस्मदादिवन्नियमः ।।१०९।।

सूत्रार्थ= मनुष्य को छोड़कर पशु-पक्षियों में भी इंद्रियों का उपादान अहंकार से भिन्न नहीं है। जैसे हमारी इंद्रियाँ अहंकार से बनी वैसे ही औरों की भी बनी।

[(देशभेदेऽ-अपि) शरीरभेदेऽपि मनुष्येतरशरीरेऽपि (अन्योपादानता न)। इन्द्रियाणां वृत्तिमतामहंकारातिरिक्तस्य भूतस्योपादानत्वं नास्ति किन्तु] शरीर भेद होने पर भी अर्थात मनुष्य शरीर से भिन्न शरीरों में जो इंद्रियाँ है जो कि वृत्ति वाली हैं उन इंद्रियों का भी उपदान अहंकार ही है कोई अहंकार से अलगा द्रव्य उसका उपादान नहीं है, किन्तु **[(अस्मदादिवत्-नियमः) अस्माकमिन्द्रियाणां यथाऽहंकार उपादानं तथैव तत्रापीन्द्रियाणामहंकारोपादानत्वनियमः]** जैसे मनुष्यो की इंद्रियों का उपादान अहंकार है वैसे ही पशु-पक्षियों की इंद्रियों का उपादान कारण भी अहंकार ही है।१०९।।

किन्तु -

निमित्तव्यपदेशात् तद्व्यपदेशः ।।११०।।

सूत्रार्थ= जो इंद्रियों को भौतिक नाम से कहा गया है उसका कथन इस दृष्टि से है कि पंचमहाभूत इंद्रियों के सहयोगी कारण है इससे इंद्रियों को पंचभौतिक कहा गया है।

[(निमित्तव्यपदेशात्) इन्द्रियाणामुपष्टम्भकत्वनिमित्तानि भूतानि तथाविधनिमित्तव्यपदेशात्] इंद्रियों के कार्य व्यवहार में सहयोग देने वाले पंचभूतादि हैं इस प्रकार का निमित्त कथन होने से **[(तद्व्यपदेशः) भूतव्यपदेशो भवतु भौतिकानीन्द्रियाणीति]** पाँच भूत इंद्रियों के कार्य करने में सहयोगी है इसलिए इंद्रियों को पंचभौतिक कह दिया, **[यथा दर्शनानन्तरे ''घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः'']** जैसा कि अन्य दर्शन में भी बताया है -नासिका, रसना, आँख, त्वचा, कान ये पांचों इंद्रियाँ भूतों से सहायता लेती हैं। **[(न्याय० १.१.१२) भवति हि निमित्ततोऽपि व्यपदेशस्तद्यथा ''अन्नमयं हि सोम्य मनः'' (छान्दो० ६.५.४) यथा वा ''यज्ञाद् भवति पर्जन्यः'' (गीता० ३.१४)]** इंद्रियाँ भूतों से नहीं ~~बनी पाँच भूतों से~~

तथाविधानां वृत्तिगतामिन्द्रियाणाम् -

न देशभेदेऽप्यन्योपादानताऽस्मदादिवन्नियम: ।।१०९।।

(देशभेदेऽ-अपि) शरीरभेदेऽपि मनुष्येतरशरीरेऽपि (अन्योपादानता न) । इन्द्रियाणां वृत्तिमतामहंकारातिरिक्तस्य भूतस्योपादानत्वं नास्ति किन्तु (अस्मदादिवत्-नियम:) अस्माकमिन्द्रियाणां यथाऽहंकार उपादानं तथैव तत्रापीन्द्रियाणामहंकारोपादानत्वनियम: ।।१०९।।

किन्तु -

निमित्तव्यपदेशात् तदव्यपदेश: ।।११०।।

(निमित्तव्यपदेशात्) इन्द्रियाणामुपष्टम्भकत्वनिमित्तानि भूतानि तथाविधनिमित्तव्यपदेशात् (तद्‌व्यपदेश:) भूतव्यपदेशो भवतु भौतिकानीन्द्रियाणीति, यथा दर्शनानन्तरे ''घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य:'' (न्याय० १.१.१२) भवति हि निमित्ततोऽपि

सहयोग लेने के कारण भौतिक कहा जाता है। जैसे कि छंदोग्य उपनिषद् में कहा- हे सोम्य - मन अन्नमय है, अथवा ऐसे ही एक और उदाहरण है - यज्ञ से बादल बनता है ।।११०।।

इंद्रियाँ अहंकार से बनी है भिन्न-भिन्न शरीरों में सब जगह ऐसा आपने कहा। अब शरीरों का भेद दिखलाया जाएगा-

ऊष्मजाण्डजजरायुजोद्भिज्जं सांकल्पिकसांसिद्धिकं चेति न नियम: ।।१११।।

सूत्रार्थ= उष्मज, अंडज, जरायुज, उद्भिज्ज, सांकल्पिक और सांसिद्धिक ये छ: प्रकार के शरीर होते हैं। परंतु छ: ही प्रकार के हों ऐसा नियम नहीं है।

[(ऊष्मजाण्डजजरायुजोद्भिज्जम्) ऊष्मजं स्वेदजं दंशादिशरीरम्] भाप-पसीने-ऊष्मा से डांस पिस्सू जुआँ आदि के शरीर होते हैं, **[अण्डजं पक्षिसरीसृपशरीरम्]** दूसरे प्रकार के शरीर जो अंडे से पैदा होते हैं जैसे पक्षी, सरकने वाले सर्प आदि, **[जरायुजं मनुष्यादिगर्भादुत्पन्नं शरीरम्]** जरायुज= गरम थैली से उत्पन्न जो शरीर हैं वह तीसरे प्रकार के होते हैं जैसे मनुष्य, पशु आदि, **[उद्भिज्जं भूमेरुद्भेदनाज्जातं वृक्षादिकम् (सांकल्पिकसांसिद्धिकं च) चकारोऽप्यर्थ:]** चौथे उद्भिज्ज जमीन को भेद कर फाड़कर पैदा होने वाले शरीर हैं जैसे- वृक्ष वनस्पति। ''च'' चकार शब्द जो सूत्र में है वह अपि अर्थ में हैं। **[सांकल्पिकं प्रारम्भसृष्टावार्षं शरीरमग्न्यादीनां वेदप्रकाशकमहर्षीणाम्]** प्रारम्भिक सृष्टि में ईश्वर ने सबको उत्पन्न किया पशु-पक्षी-वृक्ष वनस्पति और मनुष्य भी पैदा किए उनमें जो वेद प्रकाशक अग्नि, वायु आदि चार ऋषि हुए उनके वेदों का ज्ञान प्रकाश किया उनका शरीर संकल्प प्रधान होने के कारण वह सांकल्पिक शरीर वाले हुए, **सांसिद्धिकं स्वत: सिद्धं नैसर्गिकमादिसृष्टामवथुनसम्भवं शरीरमपि** सांसिद्धिक स्वाभाविक जो स्वयं पैदा हुए आदि सृष्टि में जो

व्यपदेशस्तद्यथा "अन्नमयं हि सोम्य मनः" (छान्दो० ६.५.४) यथा वा "यज्ञाद् भवति पर्जन्यः" (गीता०३.१४) ।।११०।।

इन्द्रियाणामाहंकारिकत्वं शरीरभेदेऽप्युक्तमथेदानीं स शरीरभेदः प्रदर्श्यते यच्छरीरम् -

ऊष्मजाण्डजजरायुजोद्भिज्जं सांकल्पिकसांसिद्धिकं चेति न नियमः ।।१११।।

(ऊष्मजाण्डजजरायुजोद्भिज्जम्) ऊष्मजं स्वेदजं दंशादिशरीरम्, अण्डजं पक्षिसरीसृपशरीरम्, जरायुजं मनुष्यादिगर्भादुत्पन्नं शरीरम्, उद्भिज्जं भूमेरुद्भेदनाज्जातं वृक्षादिकम् (सांकल्पिकसांसिद्धिकं च) चकारोऽप्यर्थः। सांकल्पिकं प्रारम्भसृष्टावार्षं शरीरमग्न्यादीनां वेदप्रकाशकमहर्षीणाम्, सांसिद्धिकं स्वतः सिद्धं नैसर्गिकमादिसृष्टामवथुनसम्भवं शरीरमपि, सांकल्पिकसांसिद्धिकभेदद्वयेनापि शरीरं भवतीत्यर्थः। सांसिद्धिकं स्वतः सिद्धं नैसर्गिकम्, यथा "न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः"

अमैथुनी सृष्टि हुई वे शरीर हैं, **सांकल्पिकसांसिद्धिकभेदद्वयेनापि शरीरं भवतीत्यर्थः** चार प्रकार के शरीर तो होते ही हैं दो और शरीर होते हैं एक सांकल्पिक दूसरा सांसिद्धिक, इस तरह छः प्रकार के शरीर हुए। सांसिद्धिकं स्वतः सिद्धं नैसर्गिकम् सांसिद्धिक वे हैं जो नैसर्गिक हैं स्वाभाविक है, [**यथा "न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः"**] शरीर में जो चेतना है वह स्वाभाविक नहीं है, एक एक भूत को जांच लिया चेतना भूतों में नहीं है [**(सांख्य० ३.२०) परन्तु (इति नियमः-न) इति षाड्विध्यस्य नियमो नास्ति**] परंतु ये छः प्रकार के शरीर सदा रहेंगे ऐसा नियम नहीं है [**सर्वदा सर्वत्र षड्विधानि शरीराणि भवेयुः**] सदा सर्वदा सभी जगह छः-छः प्रकार के शरीर मिलेंगे ऐसा नहीं है, [**सांकल्पिकसांसिद्धिके तु खल्वारम्भसृष्टावेव भवतः**] दो प्रकार के शरीर सांकल्पिक और सांसिद्धिक तो सृष्टि के आरम्भ में ही होते हैं। [**चातुर्विध्यस्यैव प्रवर्तनं तथैव प्रतिपादनमन्यत्र शास्त्रे न विरुध्यते**] चार पाकर के शरीर सृष्टि में चलते ही रहते हैं उनकी परंपरा चलती रहती है, ऐसा प्रतिपादन यहाँ भी है और अन्य शास्त्रों में भी है इसका विरोध नहीं है ।।१११।।

तत्र -

सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत् ।।११२।।

सूत्रार्थ= सभी छः प्रकार के शरीरों में पृथ्वी मुख्य उपादान है विशेष होने से। ये शेष चार भूत इसमें सहयोगी हैं इसलिए पंचभौतिक कहा।सभी छः प्रकार के शरीरों में पृथ्वी मुख्य उपादान है विशेष होने से। ये शेष चार भूत इसमें सहयोगी हैं इसलिए पंचभौतिक कहा।

[**(सर्वेषु पृथिवी-उपादानम्) सर्वेषु षड्विधशरीरेषु पृथिवी खलूपादानं भवति**] सभी छः प्रकार के शरीरों में पृथ्वी उपादान कारण है [**(असाधारण्यात्) वैशेष्याद् विशिष्टत्वात् पृथिव्याः**] इन सभी पांचों तत्वों में पृथ्वी विशेष है उसकी विशिष्टता होने से, [**अत एव षड्विधमपि शरीरं पार्थिवम्**] अतएव ये छः प्रकार के शरीर पार्थिव हैं। [**अथ साधारण्यात् (तद्व्यपदेशः पूर्ववत्) पाञ्चभौतिकव्यपदेशः "पाञ्चभौतिको देहः"**] शेष जो चार तत्व है वह साधारण सहयोगी हैं, इसलिए उनको साथ जोड़ करके ये कथन किया कि शरीर पंचभौतिक है [**(सांख्य० ३.१७) पूर्ववद् भवति "निमित्तव्यपदेशाद् तद्व्यपदेशः"**

(सांख्य०३.२०) परन्तु (इति नियमः-न) इति षाड्विध्यस्य नियमो नास्ति सर्वदा सर्वत्र षड्विधानि शरीराणि भवेयुः, साल्पिकसांसिद्धिके तु खल्वारम्भसृष्टावेव भवतः। चातुर्विध्यस्यैव प्रवर्तनं तथैव प्रतिपादनमन्यत्र शास्त्रे न विरुध्यते ।।१११।।

तत्र -

सर्वेषु पृथिव्युपादानमसाधारण्यात् तदव्यपदेशः पूर्ववत् ।।११२।।

(सर्वेषु पृथिवी-उपादानम्) सर्वेषु षड्विधशरीरेषु पृथिवी खलूपादानं भवति (असाधारण्यात्) वैशेष्याद् विशिष्टत्वात् पृथिव्याः, अत एव षड्विधमपि शरीरं पार्थिवम्। अथ साधारण्यात् (तद्व्यपदेशः पूर्ववत्) पाञ्चभौतिकव्यपदेशः ''पाञ्चभौतिको देहः'' (सांख्य०३.१७) पूर्ववद् भवति ''निमित्तव्यपदेशाद् तद्व्यपदेशः'' (११०) इति पूर्वोक्तसूत्रप्रकारात् पञ्चभूतनिमित्तत्वात् पञ्चभूतानि शरीरस्य निमित्तानि तु सन्त्युपष्टम्भकत्वात्तेषां तस्मादेव पाञ्चभौतिको देह उच्यते तत्रोपादानत्वं तु पृथिव्या

---

(११०) इति पूर्वोक्तसूत्रप्रकारात् पञ्चभूतनिमित्तत्वात्] ये पूर्ववत कथन है **[पञ्चभूतानि शरीरस्य निमित्तानि तु सन्त्युपष्टम्भकत्वात्तेषां]** उन पाँच भूतों के सहयोगी होने से इस कारण से शरीर को पाँच भौतिक कहा है **तस्मादेव पाञ्चभौतिको देह उच्यते तत्रोपादानत्वं तु पृथिव्या एव** इसी कारण से शरीर को पंचभौतिक कहा है क्योंकि पाँच भूतों का सहयोग है इन में पृथ्वी उपादान है ।।११२।।

इंद्रियों की उत्पत्ति अहंकार से बताई शरीर पार्थिव है पृथ्वी उसका उपादान कारण है और शरीर को जो पाँच भौतिक कहा वह भी सहयोगी होने के कारण से । उन पाँच भूतों का सद्भाव सत्ता होने से फिर इनमें प्राण का क्या स्वरूप है? उसके विषय में कहेंगे-

न देहारम्भकस्य प्राणत्वमिन्द्रियशक्तिः तस्तत्सिद्धेः ।।११३।।

सूत्रार्थ= देह का जो आरंभक है=वायु वो प्राण नहीं है। क्योंकि प्राण का स्वरूप इंद्रिय शक्ति से सिद्ध होता है अर्थात् जो इंद्रियों को शक्ति देने वाला तत्व है वह प्राण है।

[(देहारम्भकस्य प्राणत्वं न) देहारम्भकस्योपादानत्वेन पृथिवीरूपभूतस्य निमित्तत्वेन भूतपञ्चकस्य तन्मध्यादेकस्य वायोर्वा प्राणत्वं प्राणरूपे परिणम्यमानत्वं नास्ति] देह के आरंभ का उपादान पृथ्वी तत्व है उस पृथ्वी रूप भूत का और निमित रूप में चार भूत और जोड़ लेंगे तो पाँच भूतों का जो समुदाय है उस समुदाय के बीच में से एक वायु का प्राण स्वरूप नहीं है। **[वायुना प्राणः सन्दिह्यते तथा कृत्वैव वेदान्तदर्शनेऽपि प्राणस्य वायुविकारत्वं निषिध्यते]** वायु शब्द से प्राण का संदेह होता है यही सोच करके लोगों को संशय न हो इसलिए वेदांतदर्शन में कहा कि प्राण को वायु का विकार मत समझना **[''श्रेष्ठः प्राणः न वायुक्रिये पृथगुपदेशात्''(वेदान्त० २.४.८-९)]** प्राण को वायु कि क्रिया न समझें प्राण का उपदेश अलग है **[किन्तु (इन्द्रियशक्तितःतत्सिद्धेः) इन्द्रियाणां शक्तितः प्राणसिद्धिरर्थादिन्द्रियाणां शक्तिः शक्तिरूपः शक्तिप्रदः प्राणः]** किन्तु सत्य यह है कि इंद्रियों की शक्ति से प्राण की सिद्धि होती है अर्थात् प्राण वह है जो इंद्रियों को कार्य करने कि शक्ति प्रदान करता है। **[उच्यते यथा'' प्राणः...या ते तनुर्वाचि प्रतिष्ठिता या श्रोत्रे या चक्षुषि या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः'' (प्रश्नो०**

एव ।।११२।।

इन्द्रियाणामुत्पत्तिरहंकारादुक्ता शरीरं च पार्थिवं तस्य पृथिव्युपादानकत्वात् तथा पाञ्चभौतिकं शरीरं निमित्तव्यपदेशात् तत्र पञ्चभूतनिमित्तसद्भावात् पुनः प्राणः किंस्वरूपः किम्प्रकृतिकश्चेत्यत्रोच्यते –

न देहारम्भकस्य प्राणत्वमिन्द्रियशक्तितस्तत्सिद्धेः ।।११३।।

(देहारम्भकस्य प्राणत्वं न) देहारम्भकस्योपादानत्वेन पृथिवीरूपभूतस्य निमित्तत्वेन भूतपञ्चकस्य तन्मध्यादेकस्य वायोर्वा प्राणत्वं प्राणरूपे परिणम्यमानत्वं नास्ति। वायुना प्राणः सन्दिह्यते तथा कृत्वैव वेदान्तदर्शनेऽपि प्राणस्य वायुविकारत्वं निषिध्यते ''श्रेष्ठः प्राणः न वायुक्रिये पृथगुपदेशात्'' (वेदान्त० २.४.८-९) किन्तु (इन्द्रियशक्तितःतत्सिद्धेः इन्द्रियाणां शक्तितः प्राणसिद्धिरर्थादिन्द्रियाणां शक्तिः

२.१२) **अत एवेन्द्रियाणि प्राणा उच्यन्ते ''अथ ह प्राणा अहंश्रेयसि व्यूदिरे...सा ह वागुच्चक्राम... चक्षुर्होच्चक्राम...श्रोत्रं होच्चक्राम'' (छान्दो० ५.१.६-७) इन्द्रियाणि हि न भौतिकानि तान्याहंकारिकाणि तस्मात् प्राणो न भौतिकोऽपित्वभौतिकः सः, उच्यते हि भूतेभ्यः पूर्वं तस्योत्पत्तिः ''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी'' (मुण्डको० २.१.३)** (यहाँ तक का अर्थ प्रसंग विरोध होने से छोड़ दिया)] [**स एष इन्द्रियशक्तिप्रदः प्राणोऽभौतिको जीवात्मनो जीवनधर्मः**] ये जो इंद्रियों को शक्ति देने वाला प्राण है वह अभौतिक है यह जीवात्मा की वह शक्ति है जिससे जीवन धारण होता है। [**उक्तं हि ''आत्मन एष प्राणो जायते''(प्रश्नो० ३.३)**] प्रश्नोपनिषद् में कहा कि – आत्मा से ही प्राण उत्पन्न होता है अर्थात आत्मा की ही एक शक्ति है [**यदा हि जीवात्मा शरीरे प्रविशति तदैव प्राणोऽपि प्रादुर्भवति**] जब जीवात्मा शरीर में प्रवेश करता है तभी प्राणों का प्रादुर्भाव होता है, [**उत्क्रान्ते जीवात्मनि प्राणोऽप्युत्क्रामति**] जब जीवात्मा शरीर छोड़ के चला जाता है तब प्राण भी शरीर छोड़ जाता है [**''तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमुत्क्रामन्तं सर्वे प्राणा इन्द्रियाणि अनूत्क्रामन्ति'' (बृह० ४.४.२)**] जब आत्मा शरीर से निकलता है तब प्राण भी आत्मा के पीछे-पीछे निकल आता है और प्राणों के शरीर से निकालने पर सारे प्राण इंद्रियाँ भी प्राण के पीछे-पीछे निकल आते हैं। [**अनिरूद्धवृत्तौ विज्ञानभिक्षुभाष्ये च सूत्रविरुद्धं व्याख्यानं कृतम्**] अनिरुद्ध वृत्ति में और विज्ञानभिक्षु भाष्य में इस सूत्र की उल्टी विरुद्ध व्याख्या की है। [**सूत्रे तु देहारम्भकस्य प्राणत्वनिषेधः**] सूत्र में तो देह का आरंभ करने वाले वायु का प्राण रूप में निषेध किया था [**किन्तु तत्र प्राणस्य देहारम्भकत्वनिषेधः कल्पितः**] किन्तु वहाँ प्राण को देह के आरंभकत्व का निषेध किया जो ठीक नहीं [**''देहे प्राणदर्शनात् तस्य देहारम्भकत्वशंकामपनयति''**] देह में प्राण देखे जाने से उसका देहारंभकत्व होने की शंका को सूत्रकार ने दूर किया [**(अनिरुद्धः) ''प्राणस्य देहारम्भकत्वनिरसनम्'' (विज्ञानभिक्षुः)**] प्राण वायु नहीं है।।११३।।

[**प्राणस्याभौतिकत्वे जीवात्मधर्मत्वे सति भवति जीवात्मना सहैव तस्यापि शरीरे प्रवेशः**] प्राण के अभौतिक होने पर जीवात्मा का धर्म मानने पर जब जीवात्मा शरीर में प्रवेश करेगा, तब साथ में प्राण भी

शक्तिरूपः शक्तिप्रदः प्राणः । उच्यते यथा'' प्राणः...या ते तनुर्वाचि प्रतिष्ठिता या श्रोत्रे या चक्षुषि या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः'' (प्रश्नो० २.१२) अत एवेन्द्रियाणि प्राणा उच्यन्ते ''अथ ह प्राणा अहंश्रेयसि व्यूदिरे...सा ह वागुच्चक्राम... चक्षुर्होच्चक्राम...श्रोत्रं होच्चक्राम'' (छान्दो० ५.१.६-७) इन्द्रियाणि हि न भौतिकानि तान्याहशरिकाणि तस्मात् प्राणो न भौतिकोऽपित्वभौतिकः सः, उच्यते हि भूतेभ्यः पूर्वं तस्योत्पत्तिः ''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी'' (मुण्डको० २.१.३) स एष इन्द्रियशक्तिप्रदः प्राणोऽभौतिको जीवात्मनो जीवनधर्मः । उक्तं हि''आत्मन एष प्राणो जायते'' (प्रश्नो०३.३) यदा हि जीवात्मा शरीरे प्रविशति तदैव प्राणोऽपि प्रादुर्भवति, उत्क्रान्ते जीवात्मनि प्राणोऽप्युत्क्रामति''तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमुत्क्रामन्तं सर्वे प्राणा इन्द्रियाणि अनूत्क्रामन्ति'' (बृह० ४.४.२) । अनिरूद्धवृत्तौ विज्ञानभिक्षुभाष्ये च सूत्रविरुद्धं व्याख्यानं कृतम् । सूत्रे तु देहारम्भकस्य प्राणत्वनिषेधः किन्तु तत्र प्राणस्य देहारम्भकत्वनिषेधः कल्पितः ''देहे प्राणदर्शनात्

प्रवेश करेगा, [**प्राणो हि भोक्तुर्जीवात्मनोऽधिष्ठानमाश्रयो वा**] प्राण ही जीवात्मा का भोक्ता अधिष्ठान है आश्रय है [**यथा वेदान्तदर्शने निर्दिष्टम् ''प्राणवता शब्दात्''**] जैसा कि वेदान्त दर्शन में निर्दिष्ट किया है- प्राण वाले जीवात्मा के साथ (ये शब्द प्रमाण है कि भोग जीवात्मा करता है) [**(वेदान्त० २.४.१५) तदा तस्य प्राणस्य शरीरे विशिष्टं कार्यं प्रदर्श्यते** -] तब प्राण का शरीर में क्या विशेष कार्य है ये बताया जा रहा है-

भोक्तुरधिष्ठानाद् भोगायतननिर्माणमन्यथा पूतिभावप्रसक्तिः (प्रसक्तेः?) ।।११४।।

सूत्रार्थ=भोक्ता=जीवात्मा का अधिष्ठान वो प्राण, जीवात्मा के साथ प्राण शक्ति आएगी उसकी सहायता से शरीर का निर्माण होगा अन्यथा पूतिभाव= रज वीर्य सड़ जाएगा और शरीर का निर्माण नहीं होगा।

[**(भोक्तुः-अधिष्ठानात्) भोक्तुर्जीवात्मनोऽधिष्ठानादाश्रयभूतात् प्राणात् प्राणसञ्चाराज्जीवनसञ्चारात् (भोगायतननिर्माणम्) भोगायतनस्य शरीरस्य निर्माणं भवति, शरीरं हि भोगायतनम्**] भोक्ता जीवात्मा का अधिष्ठान आश्रय भूत होने से प्राण, प्राणों का संचार होने से अर्थात जीवन संचार होने से भोगायतन शरीर का निर्माण होता है शरीर ही भोग का आधार है जिसमें बैठकर जीवात्मा सुख-दुःख भोगता है [**(अन्यथा पूतिभावप्रसक्तिः) अन्यथा शुक्रशोणितयोस्तन्निष्पन्नशरीरपिण्डस्य च पूतित्वं गलितत्वं प्रसज्यते शववद्दूषितं भवेत् तन्निर्माणं न स्यादित्यर्थः**] यदि प्रारम्भ से ही आत्मा का शरीर में प्रवेश न माने तो (गर्भ रहने के दो महीने बाद माने तो) शुक्रशोणित हो जाएगा, शरीर निष्क्रिय हो जाएगा जो भ्रूंण है पिंड है वह नष्ट हो जाएगा गल जाएगा शवदूषित हो जाएगा फिर शरीर का निर्माण नहीं हो सकेगा।।११४।।

प्रश्न है- प्राण तो शरीर में जीवात्मा के साथ ही प्रवेश करता है, फिर प्राण उसका अधिष्ठान कैसे मान लिया गया? और वह जीवात्मा अपने चेतन स्वरूप से शरीर में जीवन का संचार कर ही देगा। फिर प्राण को अधिष्ठान मानने कि क्या आवश्यकता है?

अत्रोच्यते - इसका उत्तर देते हैं-

तस्य देहारम्भकत्वशंकामपनयति" (अनिरुद्धः) "प्राणस्य देहारम्भकत्वनिरसनम्" (विज्ञानभिक्षुः) ।।११३।।

प्राणस्याभौतिकत्वे जीवात्मधर्मत्वे सति भवति जीवात्मना सहैव तस्यापि शरीरे प्रवेशः, प्राणो हि भोक्तुर्जीवात्मनोऽधिष्ठानमाश्रयो वा यथा वेदान्तदर्शने निर्दिष्टम् "प्राणवता शब्दात्" (वेदान्त० २.४.१५) तदा तस्य प्राणस्य शरीरे विशिष्टं कार्यं प्रदर्श्यते -

भोक्तुरधिष्ठानाद् भोगायतननिर्माणमन्यथा पूतिभावप्रसक्तिः (प्रसक्तेः ?) ।।११४।।

(भोक्तुः-अधिष्ठानात्) भोक्तुर्जीवात्मनोऽधिष्ठानादाश्रयभूतात् प्राणात् प्राणसञ्चाराज्जीवनसञ्चारात् (भोगायतननिर्माणम्) भोगायतनस्य शरीरस्य निर्माणं भवति, शरीरं हि भोगायतनम् (अन्यथा पूतिभावप्रसक्तिः) अन्यथा शुक्रशोणितयोस्तन्निष्पन्नशरीरपिण्डस्य च पूतित्वं गलितत्वं प्रसज्यते शववद्दूषितं भवेत् तन्निर्माणं न स्यादित्यर्थः ।।११४।।

भृत्यद्वारा स्वाम्याधिष्ठितिर्नैकान्तात् ।।११५।।

सूत्रार्थ=सेवक के द्वारा ही स्वामी का अधिष्ठान अधिकार बनता है तभी वह स्वामी कहलाता है । इसलिए अकेला स्वामी जीवात्मा नहीं है।

[(स्वाम्यधिष्ठितिः-भृत्यद्वारा-एकान्तात्-न) जीवात्मा स्वामी प्राणस्तदधीनो भृत्यः] जीवात्मा स्वामी है प्राण उसके अधीन है भृत्य के समान, **[यथा हीन्द्रियाणि जीवात्मनो भृत्यरूपाणि तानि स्वस्वैकैकविषयप्रदर्शनकार्यं परिपालयन्ति तथैव प्राणस्तस्य भृत्यरूपः शरीरे जीवनसञ्चारकार्यं सम्पादयति]** जैसे इंद्रिय जीवात्मा के सेवक हैं वे अपने-अपने एक एक विषय का प्रदर्शन करने के कार्य का पालन करती हैं वैसे ही प्राण भी उसका भृत्य रूप है वह शरीर में जीवन संचार के कार्य को संपादित करेगा **[यतः स्वामिनोऽधिष्ठातृत्वं भृत्यद्वारा हि भवति]** क्योंकि जो स्वामी कहलाता है उसका कोई न कोई सेवक तो होना ही चाहिए तो प्राण आदि जीवात्मा के सेवक हैं **[न साक्षात् तस्माज्जीवनसञ्चारः प्राणस्यैव कार्यं न जीवात्मनः, तस्मान्न दोषः]** इसलिए शरीर में जीवन संचार करना ये प्राण का ही कार्य है सीधे जीवात्मा का नहीं। इसलिए इसमें कोई दोष नहीं है।।११५।।

परंतु जब जीवात्मा बाह्य भोग त्याग देता है तब वह किस अवस्था में चला जाता है? क्या उसका स्वरूप होता है? इस आकांक्षा पर कहते हैं-

समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता ।।११६।।

सूत्रार्थ= तीन अवस्थाओं में जीवात्मा ब्रह्म के तुल्य होता है, समाधि-सुषुप्ति और मोक्ष में।

[(समाधिसुषुप्तिमोक्षेषु) जीवात्मा भोक्तृभावाद्वियुक्तः समाधौ सुषुप्तौ मोक्षे चावतिष्ठते] जब जीवात्मा बाह्य स्थूल भोग से विमुक्त हो जाता है तब वह समाधि में सुषुप्ति में या मोक्ष में रहता है **[तदा स**

ननु प्राणस्तु शरीरे प्रविशति जीवात्मना साकमेव पुनः प्राणः कथं तस्याधिष्ठानं कल्प्यते स एव जीवात्मा स्वचैतन्यस्वरूपेण शरीरे जीवनसञ्चारं कुर्यात् ।

अत्रोच्यते -

भृत्यद्वारा स्वाम्याधिष्ठितिर्नैकान्तात् ।।११५।।

(स्वाम्यधिष्ठितिः-भृत्यद्वारा-एकान्तात्-न) जीवात्मा स्वामी प्राणस्तदधीनो भृत्यः, यथा हीन्द्रियाणि जीवात्मनो भृत्यरूपाणि तानि स्वस्वैकैकविषयप्रदर्शनकार्यं परिपालयन्ति तथैव प्राणस्तस्य भृत्यरूपः शरीरे जीवनसञ्चारकार्यं सम्पादयति यतः स्वामिनोऽधिष्ठातृत्वं भृत्यद्वारा हि भवति न साक्षात् तस्माज्जीवनसञ्चारः प्राणस्यैव कार्यं न जीवात्मनः, तस्मान्न दोषः ।।११५।।

समाहितः सुषुप्तो मुक्तो वा भवति] तब वह समाहित होकर एकाग्रचित होकर सुषुप्ति या मोक्ष में चला जाता है, **[तदा तस्य (ब्रह्मरूपता) ब्रह्मगुणसमापन्नता भवति]** तब जीवात्मा के ब्रह्म गुण की समानता होती है, **सांसारिकसुखदुःखे न तदा भवतः** उस समय जीवात्मा को सांसरिक सुख-दुःख नहीं होते (यहाँ यह पंक्ति मोक्ष की दृष्टि में ही ठीक है सुषुप्ति समाधि में नहीं)। **[अत्र विज्ञानभिक्षुभाष्ये ब्रह्मरूपताविषये लिखितं यत् ''अस्मच्छास्त्रे ब्रह्मशब्द औपाधिकपरिच्छेदमालिन्यादिरहितपरिपूर्णचेतनसामान्यवाचीति विवेक्तव्यम्'']** यहाँ इस सूत्र के विज्ञान भिक्षु भाष्य में ब्रह्म रूपता के विषय में लिखा है-हमारे शास्त्र में जो ब्रह्म शब्द है उस उपाधि की मलिनता से रहित हुआ, अंतःकरण आदि के संयोग से जो दोष आ जाते हैं उनसे जब व्यक्ति छुट जाता है, तब वह अपने शुद्ध स्वरूप में आ जाता है, यह ब्रह्म शब्द का विवेचन है **[(विज्ञानभिक्षुः) भवत्विदं विज्ञानभिक्षुमतं न तु सांख्यसूत्रकारमतम्]** विज्ञानभिक्षु ने जो ऐसी बात कही है यह उसका अपना मत हो सकता है, सांख्यसूत्रकार ने तो ऐसा कहा नहीं, **[न हि सांख्यसूत्रमेंतादृशमुपलभ्यते यस्मिन् ब्रह्मलक्षणं सूचितं भवेत्]** सांख्य सूत्र कोई भी ऐसा उपलब्ध नहीं होता जिसमें इस तरह का ब्रह्म का लक्षण बताया गया हो, **[यदि ह्यनेन सूत्रेण लक्ष्यमिदं स्यात्]** यदि इस सूत्र से ये कहना चाहते होते **[तर्हि ''समाधिसुषुप्तिमोक्षेषु स्वरूपता'' इति सूत्रेण भाव्यम्]** तो ऐसा कहते कि -समाधि सुषुप्ति और मोक्ष में ब्रह्म की स्वरूपता होती है, **['ब्रह्मरूपता' इत्यस्य स्थाने 'स्वरूपता' पदं स्यात्]** ब्रह्मरूपता इस शब्द के स्थान पर स्वरूपता शब्द होना चाहिए था। **[परन्तु पश्यति त्वाचार्यो न तदानीं ब्रह्मता स्वरूपता भवतीति कृत्वा 'ब्रह्मरूपता' इति पदेन वर्णयति]** परंतु सूत्रकार आचार्य कपिल मुनि इस बात को भली प्रकार समझते हैं कि उन तीन अवस्थों में जीवात्मा स्वरूप नहीं हो जाता । इसलिए उन्होने ब्रह्मरूपता इस पद का वर्णन किया है। **[अनिरुद्धवृत्त्याऽपि विज्ञानभिक्षुमतं न पुष्यते किन्तु खण्ड्यते ''ब्रह्मणा सह तुल्यरूपता'']** अनिरुद्ध के द्वारा भी विज्ञानभिक्षु का मत पुष्ट नहीं होता बल्कि खण्डन करता है ''उस समय जीवात्मा कि ब्रह्म के समान तुल्य रूपता हो जाती है'' **[(अनिरुद्धः) लोकेऽपि प्रत्यक्षमुपलभ्यते यत् सुषुप्तौ पुरुषस्य चैतन्यं न प्रतिभासते तदानीं तु स स्वचैतन्यानिभिज्ञः सन् ब्रह्मणि निमग्नो ब्रह्मतुल्यो निष्प्रपञ्चो भवति]** लौकिक प्रत्यक्ष में भी जब पुरुष सोता है तब वह बाह्य व्यवहारों से पृथक् हो जाता है (बाहर क्या हो रहा है? इससे अनभिज्ञ रहता है) वह ईश्वर में निमग्न रहता है या प्रगाड़ निद्रा में सोया हुआ है वह प्रपंच रहित हो जाता है। **[अथ स्वस्मिन् शास्त्रे यद्विषये**

परन्तु यदा जीवात्मा भोक्तृत्वं त्यजति तदा स कस्यामवस्थायां किं रूपोऽवतिष्ठत इत्याकांक्षायामुच्यते –

समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता ।।११६।।

(समाधिसुषुप्तिमोक्षेषु) जीवात्मा भोक्तृभावाद्वियुक्तः समाधौ सुषुप्तौ मोक्षे चावतिष्ठते तदा स समाहितः सुषुप्तो मुक्तो वा भवति, तदा तस्य (ब्रह्मरूपता) ब्रह्मगुणसमापन्नता भवति, सांसारिकसुखदुःखे न तदा भवतः। अत्र विज्ञानभिक्षुभाष्ये ब्रह्मरूपताविषये लिखितं यत् "अस्मच्छास्त्रे ब्रह्मशब्द औपाधिकपरिच्छेदमालिन्यादिरहितपरिपूर्णचेतनसामान्यवाची न तु ब्रह्ममीमांसायामिवैश्वर्योपलक्षितपुरूषमात्रवाचीति विवेक्तव्यम्" (विज्ञानभिक्षुः) भवत्विदं विज्ञानभिक्षुमतं न तु सांख्यसूत्रकारमतम्, न हि सांख्यसूत्रमेतादृशमुपलभ्यते यस्मिन् ब्रह्मलक्षणं सूचितं भवेत्, यदि ह्यनेन सूत्रेण लक्ष्यमिदं स्यात् तर्हि "समाधिसुषुप्तिमोक्षेषु स्वरूपता" इति सूत्रेण भाव्यम्, 'ब्रह्मरूपता' इत्यस्य स्थाने 'स्वरूपता' पदं स्यात्। परन्तु पश्यति त्वाचार्यो न तदानीं ब्रह्मता स्वरूपता भवतीति कृत्वा 'ब्रह्मरूपता' इति पदेन वर्णयति। अनिरुद्धवृत्त्याऽपि विज्ञानभिक्षुमतं न पुष्यते किन्तु खण्ड्यते

परिभाषा लक्षणं वा न क्रियते तत्र शास्त्रान्तरे कृता परिभाषा लक्षणं वाऽभिप्रेयते] यदि अपने शास्त्र में किसी वस्तु के विषय में परिभाषा लक्षण नहीं किया तो उससे जो मिलता जुलता शास्त्र है उसमें जो लक्षण किया गया है वह स्वीकार्य होता है, ऐसी शास्त्रों की पद्धति है (यदि सांख्य में सीधा-सीधा ईश्वर के विषय में नहीं कहा तो सांख्य का योग समान शास्त्र है उसमें ईश्वर का कथन पर्याप्त किया है)। **अतोऽयुक्तं विज्ञानभिक्षुमतम्** अतः विज्ञानभिक्षु का मत ठीक नहीं है।।११६।।

ब्रह्म रूपता तो तीनों अवस्थों में है, इन तीनों अवस्थों में परस्पर क्या भेद है ये प्रदर्शित करते हैं-

द्वयोः सबीजत्वमन्यस्य तद्धतिः ।।११७।।

सूत्रार्थ= दो अवस्थाओं में भोग का संस्कार बचा रहता है, जबकि तीसरी में उसका विनाश हो जाता है।

[(द्वयोः सबीजत्वम्) द्वयोः प्राथमिकयोः समाधिसुषुप्त्योर्भोक्तृभावस्य स बीजत्वमस्ति सशरीरत्वात् तयोरवस्थयोः] प्राथमिक दो अवस्थाओं में समाधि और सुषुप्ति में भोक्तृभाव (भोक्तपन) का उसमें कारण (संस्कार) विद्यमान है, क्योंकि ये दोनों अवस्थाए शरीर सहित है, **[पुनर्व्युत्थाने जागरणे च भोगमनुवर्तते हि जीवात्मा, तस्य तदा सशरीरत्वात्]** फिर जब समाधि छोड़कर व्युत्थान अवस्था में और सुषुप्ति छोड़कर जागृत अवस्था में आएगा इन दो स्थितियों में वह भोग का अनुवर्तन करता ही है, क्योंकि तब वह सशरीर है, **[परन्तु (अन्यस्य तद्धतिः) समाधिसुषुप्तिभ्यामन्यस्य मोक्षस्य भोक्तृत्वबीजभावनाशो भवति]** परंतु समाधि और सुषुप्ति से जो तीसरी अवस्था है मोक्ष की, उसमें भोगने का जो संस्कार है उसका नाश हो जाता है **[तत्र जीवात्मनोऽशरीरत्वादेष तत्र भेदः]** ।।११७।।

समाधि और सुषुप्ति तो साक्षात दिखती है वह शरीर रूप में बैठा है परंतु मोक्ष तो दिखता नहीं है, फिर

"ब्रह्मणा सह तुल्यरूपता" (अनिरुद्धः) लोकेऽपि प्रत्यक्षमुपलभ्यते यत् सुषुप्तौ पुरुषस्य चैतन्यं न प्रतिभासते तदानीं तु स स्वचैतन्यानिभिज्ञः सन् ब्रह्मणि निमग्नो ब्रह्मतुल्यो निष्प्रपञ्चो भवति। अथ स्वस्मिन् शास्त्रे यद्विषये परिभाषा लक्षणं वा न क्रियते तत्र शास्त्रान्तरे कृता परिभाषा लक्षणं वाऽभिप्रेयते। अतोऽयुक्तं विज्ञानभिक्षुमतम् ।।११६।।

तत्र ब्रह्मरूपतायास्तिसृषु खल्ववस्थासु भेदः प्रदर्श्यते -

द्वयोः सबीजत्वमन्यस्य तद्धतिः ।।११७।।

(द्वयोः सबीजत्वम्) द्वयोः प्राथमिकयोः समाधिसुषुप्त्योर्भोक्तृभावस्य बीजत्वमस्ति सशरीरत्वात् तयोरवस्थयोः, पुनर्व्युत्थाने जागरणे च भोगमनुवर्तते हि जीवात्मा, तस्य तदा सशरीरत्वात्, परन्तु (अन्यस्य तद्धतिः) समाधिसुषुप्तिभ्यामन्यस्य मोक्षस्य भोक्तृत्वबीजभावनाशो भवति तत्र जीवात्मनोऽशरीरत्वादेष तत्र भेदः ।।११७।।

मोक्ष को क्यूँ माने?

द्वयोरिव त्रयस्यापि दृष्टत्वान्न तु द्वौ ।।११८।।

सूत्रार्थ= दो जैसी अवस्थाओं (समाधि और सुषुप्ति) में इनके जैसे तीसरी अवस्था (मोक्ष) भी शास्त्रों में देखे जाने, से केवल दो से कल्याण नहीं होगा।

[(द्वयोः-इव त्रयस्य-अपि दृष्टत्वात्) समाधिसुषुप्त्योरिव तृतीयस्य मोक्षस्यापि भवतु कृतकृत्यता] समाधि और सुषुप्ति के समान जो तीसरी अवस्था है, मोक्ष उसी में कृतकृत्यता होती है। **['त्रयस्येत्यार्षप्रयोगः'** "त्रयस्य शब्द को अशुद्ध समझें अपितु आर्ष प्रयोग है" **[दृष्टत्वाच्छास्त्रदृष्टत्वात् खलु** सूत्र में दृष्टत्वाद शब्द भी है इसका अधिकतर अर्थ किया जाता है "प्रत्यक्ष देखे जाने से" परंतु मोक्ष तो प्रत्यक्ष दिखता नहीं इसलिए अर्थ बदलेगा- "शास्त्र में देखे जाने से" शास्त्र में लिखा है कि मोक्ष होता है **[(न तु द्वौ) न तु द्वे एव तृतीयो मोक्षोऽपि भवति]** मोक्ष की चर्चा शास्त्र में देखे जाने से दो ही अवस्था न समझें तीसरी अवस्था मोक्ष को भी समझें **[तथा च मोक्षवद् दुःखातीते न ते द्वे समाधिसुषुप्ती समे वा कृतकृत्यतायाम्]** तथा मोक्ष के समान दुख पूरी तरह से हट जाना इन दो अवस्थाओं समाधि सुषुप्ति में नहीं होती, इनमें दुःख से छूटने की कृतकृत्यता नहीं होगी, **[तस्मान्न ताभ्यां कृतकृत्यता तथा शास्त्रं च]** इसीलिए इन दो से पूरी सफलता नहीं मानी जाएगी, जब तक मोक्ष न मिल जाए और ऐसा ही शास्त्र भी कहता है **["तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"(यजु० ३१.१८)]** परमात्मा को जानकार ही जीवात्मा मृत्यु को पार कर सकता है, और कोई रास्ता नहीं है मोक्ष प्राप्ति के लिए **["यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति"(मुण्डको० ३.३.३)]** जब देखने वाला (जीवात्मा) देखता है चमकीले वर्ण वाले को जो जगत का बनाने वाला है स्वामी है सर्वत्र व्यापक है जो वेद का ज्ञान देने वाला है। तब वह विद्वान व्यक्ति पुण्य पाप दोनों को छोड़कर सब दोषो से रहित होकर परम समता को प्राप्त हो जाता है। **["भूतेषु भूतेषु विचिन्त्य**

समाधिसुषुप्ती तु प्रत्यक्षं दृश्यते तयोः शरीरे वर्तमानत्वात् परन्तु मोक्षस्तु न दृश्यते तयोरेव भवतु कृतकृत्यता । अत्रोच्यते -

द्वयोरिव त्रयस्यापि दृष्टत्वान्न तु द्वौ ।।११८।।

(द्वयोः-इव त्रयस्य-अपि दृष्टत्वात्) समाधिसुषुप्त्योरिव तृतीयस्य मोक्षस्यापि भवतु कृतकृत्यता ।'त्रयस्येत्यार्षप्रयोगः' दृष्टत्वाच्छास्त्रदृष्टत्वात् खलु (न तु द्वौ) न तु द्वे एव तृतीयो मोक्षोऽपि भवति तथा च मोक्षवद् दुःखातीते न ते द्वे समाधिसुषुप्ती समे वा कृतकृत्यतायाम्, तस्मान्न ताभ्यां कृतकृत्यता तथा शास्त्रं च ''तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'' (यजु०३१.१८) ''यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'' (मुण्डको०३.३.३) ''भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति'' (केनो० २.१३) ''तस्य तावदेव चिरं यावन्न विमोक्ष्ये'' (छान्दो० ६.१४.२) ।।११८।।

धीराः प्रेत्यास्माल्लोकादमृता भवन्ति''(केनो० २.१३)] ज्ञानी जन प्रत्येक वस्तु में ईश्वर का चिंतन करके इस संसार को छोाकर के मोक्ष को प्राप्त करते हैं **[''तस्य तावदेव चिरं यावन्न विमोक्ष्ये''(छान्दो० ६.१४.२)]** उसका मोक्ष होने में केवल उतनी ही देर है जितनी कि शरीर छोड़ने में।।११८।।

[सुषुप्तिसमाधिमोक्षेषु मोक्षस्योत्कृष्टतमत्वमुक्तं तस्य च ताभ्यां भेदोऽपि दर्शितः] समाधि सुषुप्ति और मोक्ष में से मोक्ष सबसे उत्तम है, ऐसा बताया गया है और उसका (मोक्ष) भेद भी दिखलाया, **[अधुना सुषुप्तिसमाध्योः समाधेरुत्कृष्टतरत्वमुच्यते]** अब समाधि और सुषुप्ति की तुलना करते हैं जिसमें समाधि उत्कृष्ट है **[सुषुप्तितः समाधिवैशिष्ट्यं प्रदर्श्यते]** सुषुप्ति की अपेक्षा समाधि की विशेषता प्रदर्शित करते हैं **[यदभ्यासवैराग्याभ्यां लब्धसमाधिर्भवति जीवन्मुक्तो जीवन् सन् मुक्तो न तु नितान्तमुक्तस्तस्य सशरीरत्वात्]** जो अभ्यास और वैराग्य से समाधि प्राप्त होती है, जिससे वह जीवन मुक्त हो जाता है, किन्तु नितांत मुक्त नहीं होगा शरीर धारण करने से, **[स च चरमदेहो यावद्देहस्तावद्दोपयोगः क्लेशकर्मयागवान् भोगारूढश्चक्रभ्रमणवद् धृतशरीरो नानर्थभाग् भवति]** और वह चरम देह वाला है, जब तक शरीर रहेगा तब तक दोष-उपयोग चलता रहेगा, क्लेश से जुड़ता रहेगा कर्म करता रहेगा भोगारूढ़ रहेगा चक्रभ्रमणवत (जैसे कुम्हार का चाक थोड़ी देर के लिए घूमता रहता है) जब तक शरीर रहेगा तब तक भोगुपभोग होता रहेगा किन्तु उससे कोई अनर्थ का भागी नहीं होता **[''तस्य तावदेव चिरं यावन्न विमोक्ष्ये''(छान्दो० ६.१४.२)]** उसको उतनी ही देर है मोक्ष में जबतक उसका शरीर न छुट जाए **[इत्येवाह -]** इस बात को आगे कहते हैं-

वासनयाऽनर्थख्यापनं* दोषयोगेऽपि न निमित्तस्य प्रधानबाधकत्वम् ।।११९।।

सूत्रार्थ= इन संस्कारों से अनर्थ का दर्शन होता है, जो जीवन मुक्त है उसको सामान्य खाना पीना आदि व्यवहार चलता रहता है उसको और क्लेश नहीं घेरते दोष नहीं लगता क्योंकि उसकी वासनाएं नष्ट हो चुकी होती हैं । वासनाओं के नष्ट होने से पुनर्जन्म को देने वाले पाप पुण्य नहीं लगते।

[(वासनया-अनर्थख्यापनम्) वासनया खल्वनर्थप्रदर्शनं भवति] वासना (संस्कारों) से अनर्थ

सुषुप्तिसमाधिमोक्षेषु मोक्षस्योत्कृष्टतमत्वमुक्तं तस्य च ताभ्यां भेदोऽपि दर्शितः, अधुना सुषुप्तिसमाध्योः समाधेरुत्कृष्टतरत्वमुच्यते सुषुप्तितः समाधिवैशिष्ट्यं प्रदर्श्यते यदभ्यासवैराग्याभ्यां लब्धसमाधिर्भवति जीवन्मुक्तो जीवन् सन् मुक्तो न तु नितान्तमुक्तस्तस्य सशरीरत्वात्, स च चरमदेहो यावद्देहस्तावद्भोपयोगः क्लेशकर्मयागवान् भोगारूढश्चक्रभ्रमणवद् धृतशरीरो नानर्थभाग् भवति ''तस्य तावदेव चिरं यावन्न विमोक्ष्ये'' (छान्दो० ६.१४.२) इत्येवाह -

वासनयाऽनर्थख्यापनं* दोषयोगेऽपि न निमित्तस्य प्रधानबाधकत्वम् ।।११९।।

(वासनया-अनर्थख्यापनम्) वासनया खल्वनर्थप्रदर्शनं भवति, अभ्यासवैराग्याभ्यां लब्धसमाधिकस्य चरमदेहस्य जीवन्मुक्तस्य वासनानावतिष्ठते तस्य चरमदेहस्य वासनाऽभावात् (दोषयोगे-अपि न) क्लेशकर्मयोगे भोगारूढस्यापि नानर्थप्रदर्शनं भवति, यतस्तथाभूतस्य चरमदेहस्य योगिनः पुण्यपापकर्मजातिर्न विद्यते, उक्तं हि ''अशुक्लकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति'' (योग० ४.७ व्यासः) (निमित्तस्य प्रधानबाधकत्वम्) दोषाणां क्लेशकर्मादीनां निमित्तं वासना वासनया

का प्रदर्शन होता है, **[अभ्यासवैराग्याभ्यां लब्धसमाधिकस्य चरमदेहस्य जीवन्मुक्तस्य वासनानावतिष्ठते]** अभ्यास और वैराग्य से जिसने समाधि को प्राप्त कर लिया है वह चरम देह बाला जीवन मुक्तावस्था वाले में वासनाएं नहीं टहरती **[तस्य चरमदेहस्य वासनाऽभावात्]** उस चरम देह वाले की वासनाओं का अभाव होने से **[(दोषयोगे-अपि न) क्लेशकर्मयोगे भोगारूढस्यापि नानर्थप्रदर्शनं भवति]** क्लेश कर्म आदि से युक्त होने भोगारूढ़ होने पर भी उसका अनर्थ नहीं होगा, **[यतस्तथाभूतस्य चरमदेहस्य योगिनः पुण्यपापकर्मजातिर्न विद्यते]** क्योंकि इस प्रकार चरम देह वाले व्यक्ति योगी की कर्म जाती पाप पुण्य वाली नहीं होती, **[उक्तं हि ''अशुक्लकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति'' (योग० ४.७ व्यासः)]** जो सन्यासी होते हैं रागद्वेष आदि क्लेश जिनके नष्ट हो चुके हैं और अंतिम देह वाले हैं उनके पाप-पुण्य वाले कर्म नहीं होते **[(निमित्तस्य प्रधानबाधकत्वम्) दोषाणां क्लेशकर्मादीनां निमित्तं वासना वासनया हि ते प्रवर्धन्ते]** जो दोष हैं क्लेश कर्मादि का जो निमित्त है वह वासना है, वासना से ही क्लेश आगे बढ़ते हैं **[वासनारूपस्य निमित्तस्य प्रधानबाधकत्वं मोक्षे भवति]** वासनाएं प्रधान रूप से पुनर्जन्म का कारण होती है उनके नष्ट होने पर मोक्ष हो जाता है, **[वासनारूपनिमित्ताभावात्तस्यालब्धसमाधिकस्य जीवन्मुक्तस्य नानर्थदर्शनं भवति]** वासनारूप निमित्त के नष्ट हो जाने पर समाधि प्राप्त व्यक्ति जो जीवन मुक्त हो चुका है उसे अनर्थ का दर्शन नहीं करना पड़ता है, **[सुषुप्तिगतस्य तु सुषुप्तेरनन्तरं भवत्येवानर्थदर्शनं वासनाया विद्यमानत्वात्]** जो सुषुप्त अवस्था में जब जागृत वास्ता में आएगा तो वासनाएं तो उसमें विद्यमान हैं वह तो अनर्थ का दर्शन करेगा ही। **[तस्मात् सुषुप्तितः समाधिरुत्कृष्टतरा तत्र ब्रह्मसम्पत्तिश्चाप्युत्कृष्टतरा सस्वात्मबोधा]** इसलिए सुषुप्ति से समाधि उत्कृष्ट है, इस समाधि में ब्रह्म की प्राप्ति भी बहुत अच्छी है उसमें अपने स्वरूप का ज्ञान होता है और ईश्वर के स्वरूप का भी ज्ञान होता है ।।११९।।

[उच्यते हि वासनयाऽनर्थख्यापनम्, सा च वासना जीवन्मुक्तस्य नास्तीति न युक्तं] पूर्वपक्षी कहता है-वासना से अनर्थ का दर्शन होता है, और वह वासना का संस्कार जीवन मुक्त में नहीं होता, ये कथन

हि ते प्रवर्धन्ते वासनारूपस्य निमित्तस्य प्रधानबाधकत्वं मोक्षे भवति, वासनारूपनिमित्ता-भावात्तस्यालब्धसमाधिकस्य जीवन्मुक्तस्य नानर्थदर्शनं भवति, सुषुप्तिगतस्य तु सुषुप्तेरनन्तरं भवत्येवानर्थदर्शनं वासनाया विद्यमानत्वात्। तस्मात् सुषुप्तितः समाधिरुत्कृष्टतरा तत्र ब्रह्मसम्पत्तिश्चाप्युत्कृष्टतरा सस्वात्मबोधा ।।११९।।

उच्यते हि वासनयाऽनर्थख्यापनम्, सा च वासना जीवन्मुक्तस्य नास्तीति न युक्तं यतो वासना संस्कारः, संस्कारादेव जीवन्मुक्तस्य चरमदेहस्य भोगक्रियाऽन्तिमा कथ्यते परन्तु क्रियासन्तानात् संस्कारसन्तानः प्रवर्तते इत्थमेकैकां क्रियां प्रति नवीन एकैकः संस्कारः प्रवर्तेत तेन लब्धसमाधिकस्य जीवन्मुक्तस्यापि संस्कारापत्तिर्वासनाप्रसक्तिः स्यात् । अत्रोच्यते -

---

अयुक्त है [**यतो वासना संस्कारः, संस्कारादेव जीवन्मुक्तस्य चरमदेहस्य भोगक्रियाऽन्तिमा कथ्यते**] क्योंकि वासना संस्कार है, और संस्कार से ही जीवन मुक्त चरम देह वाला जो व्यक्ति है उसकी भोग क्रिया अन्तिम कही जाती है [**परन्तु क्रियासन्तानात् संस्कारसन्तानः प्रवर्तते**] परंतु क्रिया की संतान से संस्कार की संतान उत्पन्न होती है [**इत्थमेकैकां क्रियां प्रति नवीन एकैकः संस्कारः प्रवर्तेत**] इस प्रकार से अनेक क्रियाएँ होंगी एक-एक क्रिया से एक-एक नया संस्कार बनेगा [**तेन लब्धसमाधिकस्य जीवन्मुक्तस्यापि संस्कारापत्तिर्वासनाप्रसक्तिः स्यात्**] इस कारण से जिसको समाधि प्राप्त हो गई, जीवन मुक्त हो गया उसको भी अनेक संस्कारों की प्राप्ति हो जाएगी। **अत्रोच्यते** - इसका उत्तर देते हैं-

एकः संस्कारः क्रियानिर्वर्तको न तु प्रतिक्रियं संस्कारभेदा बहुकल्पनाप्रसक्तेः ।।१२०।।

सूत्रार्थ= एक संस्कार से अनेक क्रियाएँ हो जाती है, प्रत्येक क्रिया के लिए अलग अलग संस्कार की अपेक्षा नहीं होती। यदि प्रत्येक क्रिया का संस्कार माना जाए तो संस्कारों का अंत भी नहीं होगा जिससे मोक्ष भी असंभव हो जाएगा।

[**(एकः संस्कारः क्रियानिर्वर्तकः) एको हि संस्कारः क्रियां निर्वर्तयति यावत्क्रियासमाप्तिः क्रियासन्तानसमाप्तिर्वा स एवैकः संस्कारः प्रवर्तते**] एक ही संस्कार क्रिया को उत्पन्न करता है जब तक वो क्रिया समाप्त हो, एक ही संस्कार चलता रहता है [**(न तु प्रतिक्रियं संस्कारभेदाः) न हि प्रतिक्रियं प्रतिक्रियासन्तानं भिन्नभिन्नः संस्कारो नवो नवः संस्कारः समुद्भवति**] और न ही प्रत्येक क्रिया के लिए या क्रिया संतान के लिए अलग-अलग संस्कार नया-नया संस्कार उत्पन्न नहीं होता [**(बहुकल्पनाप्रसक्तेः) क्रियासंस्कारयोः पौनःपुन्येन बहुकल्पनाप्रसंगो भवेत्**] यदि प्रत्येक क्रिया का संस्कार मानें तो बार-बार क्रिया से बहुत से संस्कार हो जाएंगे, बहुकल्पना प्रसंग हो जाएगा तो मोक्ष होना असंभव हो जाएगा, [**न तदा तत्कल्पनासमाप्तिर्भवेत्**] और तब उस कल्पना से समाप्ति संस्कार की न होगी। [**अतः स लब्धसमाधिको जीवन्मुक्तश्चक्रभ्रमणवद् धृतशरीरः पूर्वसंस्कारलेशतो भोगक्रियामनुतिष्ठन् न पुनः संस्कारवशगो भवति**] अतः वह समाधि प्राप्त व्यक्ति जो जीवन मुक्त हो गया है चक्रभ्रमणवत शरीर को धारण करता हुआ जो पूर्व के संस्कार बचे हुए हैं उसके कारण वह भोग क्रिया का अनुष्ठान करता रहता है और नए नए संस्कारों के अधीन

एकः संस्कारः क्रियानिर्वर्तको न तु प्रतिक्रियं संस्कारभेदा बहुकल्पनाप्रसक्तेः ।।१२०।।

(एकः संस्कारः क्रियानिर्वर्तकः) एको हि संस्कारः क्रियां निर्वर्तयति यावत्क्रियासमाप्तिः क्रियासन्तानसमाप्तिर्वा स एवैकः संस्कारः प्रवर्तते (न तु प्रतिक्रियं संस्कारभेदाः न हि प्रतिक्रियं प्रतिक्रियासन्तानं भिन्नभिन्नः संस्कारो नवो नवः संस्कारः समुद्भवति (बहुकल्पनाप्रसक्तेः) क्रियासंस्कारयोः पौनःपुन्येन बहुकल्पनाप्रसंगो भवेत्, न तदा तत्कल्पनासमाप्तिर्भवेत्। अतः स लब्धसमाधिको जीवन्मुक्तश्चक्रभ्रमणवद् धृतशरीरः पूर्वसंस्कारलेशतो भोगक्रियामनुतिष्ठन् न पुनः संस्कारवशगो भवति तस्य तदन्तिमभोगक्रिया संस्कारलेशतः प्रवृत्ता संस्कारलेशतो भोगः समाप्यते, यथा कुलालचक्रं वेगरूपसंस्काराद् भ्रमति संस्कारलेशान्नाग्रे पुनः संस्कारसम्भवः। उक्तं यथा ''नापनीतक्लेशः 'कर्माशयः' कर्मसंस्कारः प्रारोहसमर्थः'' (योग० २.१३ व्यासः) तस्मात्सुषुप्तिमतः

वह नहीं होता [**तस्य तदन्तिमभोगक्रिया संस्कारलेशतः प्रवृत्ता संस्कारलेशतो भोगः समाप्यते**] उसकी अन्तिम भोग क्रिया बचे हुए संस्कार से उत्पन्न होती है और बचे हुए संस्कार से भोग को प्राप्त करता रहता है, यथा [**कुलालचक्रं वेगरूपसंस्काराद् भ्रमति संस्कारलेशान्नाग्रे पुनः संस्कारसम्भवः**] जैसे कुम्हार का चाक वेग रूपी संस्कार से घूमता रहता है और वेग के समाप्त होने पर वह नहीं घूमता फिर संस्कार संभव नहीं होता दुबारा संस्कार से नहीं घूमता।[**उक्तं यथा ''नापनीतक्लेशः 'कर्माशयः' कर्मसंस्कारः प्ररोहसमर्थः''**] जैसे कहा है- जिस कर्माशय का जो क्लेश हटा दिया गया है ऐसी स्थिति में वे कर्म संस्कार अगला जन्म करने में समर्थ नहीं होगा [**(योग० २.१३ व्यासः) तस्मात्सुषुप्तिमतः समाधिमान् तूत्कृष्टतरः**] इसलिए सुषुप्ति अवस्था की स्थिति की तुलना में जो समाधि प्राप्त है उसकी स्थिति उत्कृष्ट है।।१२०।।

[**मोक्षे तु स्याज्जीवात्मनो भोक्तृत्वाभावस्तस्य स्वरूपनिष्ठत्वात्, समाधौ भोक्तृत्वाभावो भवेद् भोक्तृबुद्धेर्निरुद्धत्वात्**] समाधि काल में भी भोग से निवृत्ति होती है, भोगने की बुद्धि वृत्ति को रोक रखा है ईश्वर से आनंद प्राप्त करने के कारण, [**सुषुप्तौ भोक्तृत्वाभावो गाढ़निद्रयाऽभिभूतत्वात्**] सुषुप्ति में भी भोक्तृभाव से निरुद्ध है प्रगाढ़ निद्रा में क्या भोग करेगा, [**अनेन बाह्यबुद्धिर्भोक्तृत्वसाधिकेति गम्यते**] जब जीवात्मा सुख-दुःख आदि का भोग करेगा तो बाह्य बुद्धि से भोग करेगा [**तर्हि यदुज्भिज्जं शरीरं निर्दिष्टं तत्र बाह्यबुद्धेरभावोऽस्ति**] आपने छः प्रकार के शरीर कहे थे उनमें जो उद्भिज्ज शरीर हैं उसमें तो बाह्य बुद्धि का अभाव है [**तेन तत्र भोक्तृत्वं न सिध्यति**]इससे वहाँ तो भोग सिद्ध होता ही नहीं,[**भोक्तृत्वाभावाच्छरीरत्वमपि न सेत्स्यतीत्याशंकायामाह -**] भोगतृत्व का अभाव होने से वह शरीर भी कैसे सिद्ध हो पाएगा? ऐसी आशंका पर कहते हैं-

न बाह्यबुद्धिनियमः ।

वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत् ।।१२१-१२२।।

सूत्रार्थ= भोग में बाह्य बुद्धि का नियम नहीं है, भोग में आंतरिक बुद्धि से भी सुख-दुःख होता है । जैसे वृक्ष, गुल्म, लता, औषधि, वनस्पति, घास, इन सब भोक्ताओं का भी भोगायतन है, जैसे पहले और शरीर

समाधिमान् तूत्कृष्टतरः ।।१२०।।

मोक्षे तु स्याज्जीवात्मनो भोक्तृत्वाभावस्तस्य स्वरूपनिष्ठत्वात्, समाधौ भोक्तृत्वाभावो भवेद् भोक्तृबुद्धेर्निरुद्धत्वात्, सुषुप्तौ भोक्तृत्वाभावो गाढनिद्रयाऽभिभूतत्वात्, अनेन बाह्यबुद्धिर्भोक्तृत्वसाधिकेति गम्यते तर्हि यदुद्भिज्जं शरीरं निर्दिष्टं तत्र बाह्यबुद्धेरभावोऽस्ति तेन तत्र भोक्तृत्वं न सिध्यति, भोक्तृत्वाभावाच्छरीरत्वमपि न सेत्स्यतीत्याशंकायामाह -

न बाह्यबुद्धिनियमः ।

वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत् ।। १२१-१२२।।

बताए थे ।

अनयोः सूत्रयोरेकवाक्यताऽस्ति - दोनों सूत्रों में परस्पर संबंध है-

[(बाह्यबुद्धिनियमः-न) भोक्तृत्वे बाह्यबुद्धेर्नियमो नास्ति बाह्य बुद्धि हो तभी भोग हो ऐसा नियम नहीं है, भवति बाह्यबुद्ध्याऽपि भोक्तृत्वं परन्तु तत्र न नियमः] बाह्य बुद्धि से भी भोग होता है, परंतु बाह्य बुद्धि होगी तभी भोग होगा ऐसा प्रतिबंध नहीं है, **[यतो बाह्यबुद्धिमन्तरेणापि खल्वन्तर्बुद्धया भोक्तृत्वं भवति हि]** क्योंकि बाह्य स्थूल भोग के बिना भी आंतरिक दृष्टि से बुद्धि से सुख-दुःख का ज्ञान भोग होता है **[(वृक्षगुल्मलतौषधिवनस्पतिवीरुधादीनाम्-अपि भोक्तृभोगायतनत्वं पूर्ववत्) वृक्षादीनामुद्भिज्जशरीराणामन्तःसंज्ञानामपि जीवात्मभोगायतनत्वमस्ति पूर्ववदूष्मजादिजंगमशरीरवत्]** वृक्ष आदि उद्भिज्ज शरीरों में आंतरिक अनुभूतियाँ होती हैं, जैसे कि पहले छः प्रकार के शरीर बताए थे उष्मज आदि जंगम शरीर के समान।।१२१-१२२।।

तदेतद् वृक्षादीनां भोक्तृभोगायतनत्वमन्तःसंज्ञत्वं च स्मृतेश्च ।।१२३।।

सूत्रार्थ= श्रुति से और स्मृति से ये सिद्ध है कि वृक्षों में आत्मा है, कर्मफल है योनि है।

[(स्मृतेः-च) स्मृतेश्च श्रुतेश्च सिध्यति ये स्मृति और श्रुति से सिद्ध है। **श्रुतिस्तावत् ''सूर्य चक्षुर्गच्छतु वातमात्मा दिवं च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठ शरीरैः''(ऋ० १०.१६.३)]** श्रुति का प्रमाण देते हुए कहते हैं, (इस प्रमाण को ऋग्वेद से लिख लेंगे) **[''योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथा श्रुतम्''(कठो० २.५.७)]** कुछ जीवात्माएँ शरीर को धारण करने के लिए योनि को प्राप्त करते हैं, जिनमें कुछ पशु आदि का शरीर प्राप्त करते हैं। अन्य जीवात्माएँ वृक्ष वनस्पति का शरीर प्राप्त करते हैं। जैसा कर्म होता है वैसा फल (शरीर) मिलता है । **[''अस्य महतो वृक्षस्य यो मूले...यदेकां शाखां जीवो जहात्यथ सा शुष्यति... सर्वं जहाति सर्वः शुष्यति... जीवापेतं किलेदं म्रियते''(छान्दो० ६.११.१-३)]** इस बड़े महान वृक्ष के मूल में कोई कुल्हाड़ी चलाए तो वह कुछ पानी छोड़ता है। जब वह जीवात्मा इतने बड़े वृक्ष के एक शाखा को छोड़ देता है

अनयोः सूत्रयोरेकवाक्यताऽस्ति -

(बाह्यबुद्धिनियमः-न) भोक्तृत्वे बाह्यबुद्धेर्नियमो नास्ति, भवति बाह्यबुद्धयाऽपि भोक्तृत्वं परन्तु तत्र न नियमः, यतो बाह्यबुद्धिमन्तरेणापि खल्वन्तर्बुद्धया भोक्तृत्वं भवति हि (वृक्षगुल्मलतौषधिवनस्पतिवीरुधादीनाम्-अपि भोक्तृभोगायतनत्वं पूर्ववत्) वृक्षादीनामुद्भिज्जशरीराणामन्तःसंज्ञानामपि जीवात्मभोगायतनत्वमस्ति पूर्ववदूष्मजादिजंगमशरीरवत् ।।१२१-१२२।।

तदेतद् वृक्षादीनां भोक्तृभोगायतनत्वमन्तःसंज्ञत्वं च स्मृतेश्च ।।१२३।।

(स्मृतेः-च) स्मृतेश्च श्रुतेश्च सिध्यति । श्रुतिस्तावत् ''सूर्यं चक्षुर्गच्छतु वातमात्मा दिवं च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठ शरीरैः'' (ऋ० १०.१६.३) ''योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथा श्रुतम्'' (कठो० २.५.७) ''अस्य महतो वृक्षस्य यो मूले...यदेकां शाखां जीवो जहात्यथ सा शुष्यति... सर्वं जहाति सर्वः शुष्यति...

वहाँ उसका संबंध टूट जाता है अथवा वह शाखा सूख जाती है, जब पूरे वृक्ष को जीवात्मा छोड़ देता है तो पूरा वृक्ष सूख जाता है। जब जीव वृक्ष को छोड़ देता है तो वह वृक्षरूपी शरीर मर जाता है **[स्मृतिः खल्वपि ''शरीरजैः कर्मदोषैर्याति स्थावरतां नरः''(मनु० १२.९)]** स्मृति वचन भी यह कहता है- शरीर से जो कर्म दोष किए जाते हैं उन शारीरिक अपराधों के कारण मनुष्य स्थावर आदि योनि को प्राप्त होता है **[सूत्रे स्मृतिनिर्देशस्य प्राधान्यम् 'श्रुतेश्च' इत्येतेन सूत्रेणापि भवितव्यमासीत्]** सूत्र में स्मृति निर्देश की प्रधानता है - 'श्रुतेश्च' इस प्रकार से भी सूत्र हो सकता था। **[परन्तु 'न बाह्यबुद्धिनियमः' इति कथनस्य प्राधान्यात् स्मृतिकथनप्राधान्यमत्र]** परंतु इस प्रकार से सूत्र नहीं बनाया ''स्मृतेश्च'' स्मृति की प्रधानता रखी है। पिछले सूत्र में कहा था की ''बाह्य बुद्धि का नियम नहीं हैं'' , इस कथन को ध्यान में रखते हुए, यहाँ स्मृति की प्रधानता होगी। **[यतस्तत्र वृक्षादीनामन्तर्बुद्धित्वं स्पष्टं विहितम् ''अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः''(मनु० १.४९)]** क्योंकि इन वृक्ष आदि को स्मृति शास्त्रों में अंतस अनुभूति बाला स्पष्ट रूप से बताया है ''ये जो वृक्ष आदि योनि के प्राणी है ये आन्तरिक अनुभूति वाले सूख-दुःख को भोगते रहते हैं''।।१२३।।

वृक्षादि यदि जीव हैं देह है और वहाँ बो आन्तरिक अनुभूति वाले है। प्रश्न है- वो कर्म का आचरण कैसे करेंगे? क्योंकि कर्म तो बाह्य संज्ञा से संपादित होते हैं। इस आकांक्षा पर कहते हैं-

न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ।।१२४।।

सूत्रार्थ= केवल शरीर मात्र मिल जाने से कर्म करने का अधिकार नहीं मिलता, क्योंकि कर्म करने के लिए विशेष योग्यता की अपेक्षा होती है।

[(देहमात्रतः कर्माधिकारित्वं न) देहमात्रत एव कर्माधिकारित्वं कर्मानुष्ठायित्वं कर्मविधानं नास्ति] सिद्धांती कहते हैं- वृक्षादि को कर्म करने का अधिकार नहीं है, देहमात्र के मिलने से कर्म करने का

जीवापेतं किलेदं म्रियते'' (छान्दो० ६.११.१-३) स्मृतिः खल्वपि ''शरीरजैः कर्मदोषैर्याति स्थावरतां नरः'' (मनु० १२.९) सूत्रे स्मृतिनिर्देशस्य प्राधान्यम् 'श्रुतेश्च' इत्येतेन सूत्रेणापि भवितव्यमासीत्। परन्तु 'न बाह्यबुद्धिनियमः' इति कथनस्य प्राधान्यात् स्मृतिकथनप्राधान्यमत्र यतस्तत्र वृक्षादीनामन्तर्बुद्धित्वं स्पष्टं विहितम् ''अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः'' (मनु० १.४९) ।।१२३।।

वृक्षादयो जीवानां देहास्तत्र च तेऽन्तःसंज्ञा पुनस्तैः कथं कर्माण्यनुष्ठातव्यानि, कर्माणि तु बहिः संज्ञया सम्पद्यन्ते-इत्याकांक्षायामुच्यते -

न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ।।१२४।।

(देहमात्रतः कर्माधिकारित्वं न) देहमात्रत एव कर्माधिकारित्वं कर्मानुष्ठायित्वं कर्मविधानं नास्ति

अधिकार या कर्म का अनुष्ठान अथवा कर्म का विधान नहीं है। **[यतः (वैशिष्ट्यश्रुतेः) विशिष्टत्वश्रवणात्]** क्योंकि कर्म करने के लिए विशेष योग्यता (होनी चाहिए) सुनी जाने से, **[न हि सर्वप्राणिनां कर्मविधायिका श्रुतिः]** सब प्राणियों को कर्म करने का अधिकार है, ऐसा कोई श्रुति वचन नहीं है। **[किन्तु ''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।''(यजु० ४०.२)]** किन्तु शास्त्र में तो ये कहा गया है कि - कर्म करते हुए व्यक्ति सौ वर्ष तक जीने कि इच्छा करे। (ये कर्म करने का अधिकार मनुष्यो को है)यदि मनुष्य निष्काम कर्म करता हुआ जीने की इच्छा करे तो वह कर्म के बंधन में नहीं पड़ेगा, इसके अतिरिक्त कोई रास्ता नहीं। **[नरस्य-मनुष्यस्य कर्मविधायिका श्रुतिरस्ति]** कर्म करने का अधिकार मनुष्य को है, सबको नहीं। **[तस्मान्न दोषो वृक्षादीनामन्तःसंज्ञत्वात् कर्माभावे]** इसलिए वृक्ष आदि आंतरिक अनुभूति वाले है वे कोई कर्म नहीं कर पाते तो इसमें कोई दोष नहीं है, **[नहि वृक्षादिषु कर्मापेक्षा ते तु भोगदेहा एव]** वृक्षादि में कर्म की अपेक्षा नहीं है वे तो भोग देह है ।।१२४।।

यतो हि -

त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः ।।१२५।।

सूत्रार्थ= तीन प्रकार के शरीरों की जीवात्माओं के लिए व्यवस्था है, एक है कर्मदेह जिसमें कर्म की प्रधानता है, दूसरा है उपभोग देह पशुपक्षियों की, उसमें उपभोग की प्रधानता है और तीसरा है उभयदेह- जिसमें मनुष्य कर्म भी करते हैं और भोग भी भोगते हैं।

[(त्रिधा व्यवस्था) त्रिप्रकारा व्यवस्था देहविषये सा चेत्थं यत् (त्रयाणां कर्मदेहोपभोगदेहोभयदेहाः) सांकल्पिकशरीरवतां वेदप्रकाशकमहर्षीणामग्न्यादीनां कर्मदेहः] देह के विषय में शरीर के विषय में तीन प्रकार की व्यवस्था है, एक है कर्मदेह दूसरा है भोगदेह और तीसरा उभयदेह (ये जो तीन देह है ये प्रधानता के कारण तीन प्रकार के हैं)। जैसेकि पहले छः प्रकार के शरीर हुए सांकल्पिक शरीर वाले वेद का प्रकाश करने वाले अग्नि आदि चार ऋषियों के जो शरीर थे, वे कर्म देह थे।, **[नहि ते**

।यतः (वैशिष्ट्यश्रुतेः) विशिष्टत्वश्रवणात्, न हि सर्वप्राणिनां कर्मविधायिका श्रुतिः ।किन्तु ''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।'' (यजु० ४०.२) नरस्य-मनुष्यस्य कर्मविधायिका श्रुतिरस्ति । तस्मान्न दोषो वृक्षादीनामन्तःसंज्ञत्वात् कर्माभावे, नहि वृक्षादिषु कर्मापेक्षा ते तु भोगदेहा एव ।।१२४।।

यतो हि -

त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः ।।१२५।।

(त्रिधा व्यवस्था) त्रिप्रकारा व्यवस्था देहविषये सा चेत्थं यत् (त्रयाणां कर्मदेहोपभोगदेहोभयदेहाः) सांकल्पिकशरीरवतां वेदप्रकाशकमहर्षीणामग्न्यादीनां कर्मदेहः, नहि ते भोगाय प्रादुर्भूताः किन्तु वेदप्रकाशनं हि तेषां कर्म तस्मात् ते कर्मदेहाः। मनुष्येतराणां पशुपक्ष्यादीनां प्राणिनामुद्भिज्जानां वृक्षादीनां चोपभोगदेहस्तेषां कर्माचरणासम्भवात्। विधिनिषेधदृष्ट्या

भोगाय प्रादुर्भूताः किन्तु वेदप्रकाशनं हि तेषां कर्म तस्मात् ते कर्मदेहाः] वे जो चार ऋषियों के शरीर थे वे भोग के लिए उत्पन्न नहीं हुए थे किन्तु वेद का प्रकाश करना पढ़ना-पढ़ाना, प्रचार करना यही मुख्य कर्म था, इसलिए वे संसार में आए और कर्मदेह कहलाए। **[मनुष्येतराणां पशुपक्ष्यादीनां प्राणिनामुद्भिज्जानां वृक्षादीनां चोपभोगदेहस्तेषां कर्माचरणासम्भवात्]** मनुष्यों से जो भिन्न हैं पशु-पक्षी आदि हैं इन सबका जो शरीर है वह उपभोग देह है (ये भोगप्रधान देह हैं) इसलिए कर्म का आचरण असम्भव होने से, ये कर्म देह नहीं हैं अपितु भोग देह हैं। **[विधिनिषेधदृष्ट्या पुण्यपापकर्मानुष्ठानासम्भवात् ते तूपभोगदेहाः]** (यहाँ असम्भव न लिखकर गौंण लिखना चाहिए) विधि निषेध की दृष्टि से उनके लिए कर्म का विधान ज्यादा नहीं है भोग प्रधान है। **[मनुष्याणामुभयदेहः कर्मभोगदेहास्ते कर्मापि कुर्वन्ति भोगञ्चानुतिष्ठन्ति]** मनुष्यों के जो शरीर हैं वे उपभोग देह हैं, क्योंकि ये कर्म भी करते है और कर्मों के फल को भोगते भी हैं, **[तस्मान्मनुष्याःकर्मोपभोगदेहाः]** इसलिए मनुष्यो का कर्म करने का और भोगने का देह होने से उभय देह कहलाता है ।।१२५।।

किन्तु -

न किञ्चिदप्यनुशयिनः ।।१२६।।

सूत्रार्थ= जो अनुशयी जीव है वह जिस-जिस शरीर में जाएगा वहाँ उसका कोई भोग या कर्म नहीं होगा, उसकी तो केवल यात्रा मात्र है।

[(अनुशयिनः किञ्चित्-अपि न) अनुशयः पुनर्जन्मार्थपुण्यपापसंस्कारस्तथा परशरीरावेशपराक्रमश्च यस्यास्तीति साऽनुशयी] अनुशय= पुनर्जन्म की प्राप्ति के लिए पुण्य पाप का संस्कार पर शरीर में प्रवेश करने की शक्ति है जिस योगी की वो भी अनुशयी है (मरने के साथ आत्मा अपने कर्म साथ लेकर चलता है वो अनुशयी और जो योगी है मृतक शरीर में घुसने की योग्यता रखता है वह भी अनुशयी होता

पुण्यपापकर्मानुष्ठानासम्भवात् ते तूपभोगदेहाः। मनुष्याणामुभयदेहः कर्मभोगदेहास्ते कर्मापि कुर्वन्ति भोगञ्चानुतिष्ठन्ति, तस्मान्मनुष्याःकर्मोपभोगदेहाः।।१२५।।

किन्तु -

न किञ्चिदप्यनुशयिनः ।।१२६।।

(अनुशयिनः किञ्चित्-अपि न) अनुशयः पुनर्जन्मार्थपुण्यपापसंस्कारस्तथा परशरीरावेशपराक्रमश्च यस्यास्तीति साऽनुशयी तस्य किञ्चिदपि तद्देहे कर्म वा भोक्तव्यं वा नास्ति यतो न स तद्देहाभिमानी स तु तत्रानुशयी । अनुशयी भवति द्विविधः, एकस्तु वृक्षादिषु स्थावरयोनिषु तथाऽन्यो मनुष्यादिषु जंगमयोनिषु।

है। किन्तु योगी का मृतक शरीर में घुसना ये बात अमान्य है) **[तस्य किञ्चिदपि तद्देहे कर्म वा भोक्तव्यं वा नास्ति]** अनुशयी जीव जिस देह में बैठा है वह न तो कोई कर्म करेगा और न कोई भोग करेगा **[यतो न स तद्देहाभिमानी स तु तत्रानुशयी]** क्योंकि वह उस शरीर का अभिमानी जीव नहीं है वह तो वहाँ अनुशयी है। **[अनुशयी भवति द्विविधः, एकस्तु वृक्षादिषु स्थावरयोनिषु तथाऽन्यो मनुष्यादिषु जंगमयोनिषु]** अनुशयी दो प्रकार का होता है, एक तो वृक्षादि स्थावर योनि में और दूसरा मनुष्यादि में जंगम चलने फिरने वाले में (ये दूसरे वाला चलने फिरने वाला अमान्य है)। **[यस्तु वृक्षादिषु भवत्यनुशयी स तु परतन्त्रः स्वकर्मानुसारेणानुशयवान् सन् चन्द्रलोकादावृत्य वृक्षादिष्वनुशेते]** किसी जीव को मनुष्य योनि के बाद वृक्ष आदि में बैठा हुआ जो अनुशयी जीव है वह परतंत्र है, अपने कर्म के अनुसार वह वृक्ष आदि में बैठा है। **[उक्तं यथा ''कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च'']** जैसा कि वेदान्त दर्शन में कहा गया है- कर्म पूरा हो जाने पर वो अनुशयी हो जाता है श्रुति और स्मृति से ये सिद्ध होता है कि शरीर छोड़ने के बाद जीवात्मा दूसरे शरीर में जाता है, और जैसा यहाँ से गया था वैसा ही लौटकर आता है **[(वेदान्त० ३.१.८) ''अन्याधिष्ठितेषु पूर्ववदभिलापात्'']** जिनमें जीवात्मा पहले से निवास कर रहे हैं ऐसे शरीरों में अनुशयी जीव कुछ देर के लिए जाकर टिक जाता है **[(वेदान्त० ३.१.२४) ''अथ य इमें ग्राम इष्टापूर्ते दत्तमित्युपासते...ते पुनर्निवर्तन्ते]** और जो यहाँ गाँव में निवास करके यज्ञादि सामाजिक परोपकार दान आदि के कार्य करते हैं, वे फिर से लौट आते हैं उनका पुनर्जन्म हो जाता है **[यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति। अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्रूप एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्...''(छान्दो० ५.१०.२-७)]** जैसे मरने के बाद आत्मा आकाश में जाता है आकाश से वायु, वायु से धुएँ की स्थिति को प्राप्त हो गए, धुएं से कच्चे बादल में गया। कच्चे बादल से घने बादल में, घने बादल से वर्षा के साथ-साथ धरती पर आए, फिर जो खेती में चावल, जौं, औषधि, वनस्पति हैं उनमें वो आत्माएँ पहुँच जाते हैं। वहाँ से निकालना उनका मुश्किल हो जाता है पुनर्जन्म में पड़ जाते हैं, जिस-जिस अन्न में वह गए वह अन्न जिस-जिस मनुष्य ने खाया उसके शरीर में चला गया और कोई पशु खाएगा तो उसके शरीर में चला जाता है फिर उसके वीर्य से उसके संतान के रूप में जन्म लेता है। जो-जो यहाँ अच्छे कार्य करते हैं वे शीघ्र ही शरीर छोडने के बाद

यस्तु वृक्षादिषु भवत्यनुशयी स तु परतन्त्रः स्वकर्मानुसारेणानुशयवान् सन् चन्द्रलोकादावृत्य वृक्षादिष्वनुशेते। उक्तं यथा ''कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च'' (वेदान्त० ३.१.८) ''अन्याधिष्ठितेषु पूर्ववदभिलापात्'' (वेदान्त० ३.१.२४) ''अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते...ते पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति । अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्रूप एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्...''(छान्दो० ५.१०.२-७) ते एतेऽनुशयिनो वृक्षादिषु खल्वनुशयाना वृक्षादीनामन्तःसंज्ञया भोगमनुतिष्ठतां तद्भोगेन सम्पर्करहितास्तत्र एवानुशेरते न तेषां भोगस्तत्र भवति तत्र तु तेषां यात्रामात्रमेव

अच्छी योनि को प्राप्त होते हैं **[ते एतेऽनुशयिनो वृक्षादिषु खल्वनुशयाना वृक्षादीनामन्तःसंज्ञया भोगमनुतिष्ठतां तद्भोगेन सम्पर्करहितास्तत्र एवानुशेरते]** ये समस्त अनुशयी जीव वृक्षादि में निवास करते हुए और जो अन्तः सज्ञा से भोग कर रहे हैं वृक्ष शरीर से। उस वृक्ष वाली आत्माओं से ये अनुशयी आत्मा संपर्क रहित होती हैं केवल वहाँ निवास करते हैं **[न तेषां भोगस्तत्र भवति तत्र तु तेषां यात्रामात्रमेव]** वहाँ ये अनुशयी जीव का कोई भोग या कर्म नहीं होता केवल इनकी तो यात्रा मात्र है। **[अन्योऽनुशयी भवति योगी यः परदेहावेशपराक्रमवान् भवति]** दूसरा अनुशयी योगी है वह दूसरे के देह में प्रवेश करने कि क्षमता वाला है **[स परदेहेऽनुशेते परदेहे प्रविशति]** वह योगी दूसरे देह में अनुशयी बन कर घुस जाता है और वहाँ निवास करता है। **[उक्तं हि योगदर्शने ''बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः'']** योगदारशन के सूत्र में कहा है कि- बंधन का कारण शिथिल कर देने से और शरीर से बाहर निकले की क्रिया समझ लेने से चित्त दूसरे के शरीर में प्रविष्ट होता है **[(योग० ३.३८) तथाविधस्य परशरीराविष्टस्यानुशयिनो योगिनस्तच्छरीरवर्ति न कर्म न च भोक्तव्यं तत्र परशरीरे भवति]** इस प्रकार से दूसरे के शरीर में प्रविष्ट हुए योगी का उस शरीर में होने वाला न तो वह कर्म करता है और न ही वहाँ कोई सुख दुःख भोगता है, केवल शरीर में घुस जाता है **[तच्छरीरस्थक्रमभोगाभ्यां स न सम्पृच्यते तत्र तु तस्य योगकौतूहलप्रदर्शनमेव]** उस दूसरे शरीर में होने वाले कर्म और भोग से ये संयुक्त नहीं होता, वह तो केवल योग विद्या का कौतूहल प्रदर्शन दिखाना मात्र है (ये मान्यता ठीक नहीं है)।।१२६।।

तस्यानुशयिनः कुतो न भोगादिरित्युच्यते - उस अनुशयी जीव को ये भोग आदि सुख-दुःख क्यों नहीं होते? इस पर कहते हैं-

न बुद्धयादिनित्यत्वमाश्रयविशेषेऽपि वह्निवत् ।।१२७।।

सूत्रार्थ= बुद्धि आदि पदार्थ सदा ही जीवात्मा को सुख दुःख का भोग नहीं कराते, जब तक उनको आश्रय विशेष न मिल जाए। जैसे अग्नि किसी पदार्थ में विद्यमान है किन्तु उपयुक्त साधन न मिलने तक उद्बुद्ध नहीं होती।

[(आश्रयविशेषे-अपि) अनुशयिनः पुनर्जन्मप्राप्तये वृक्षादिष्वभिनिविष्टस्य जीवस्य तथा

। अन्योऽनुशयी भवति योगी यः परदेहावेशपराक्रमवान् भवति स परदेहेऽनुशेते परदेहे प्रविशति । उक्तं हि योगदर्शने ''बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः'' (योग० ३.३८) तथाविधस्य परशरीराविष्टस्यानुशयिनो योगिनस्तच्छरीरवर्ति न कर्म न च भोक्तव्यं तत्र परशरीरे भवति तच्छरीरस्थक्रमभोगाभ्यां स न सम्पृच्यते तत्र तु तस्य योगकौतूहलप्रदर्शनमेव ।।१२६।।

तस्यानुशयिनः कुतो न भोगादिरित्युच्यते -

न बुद्ध्यादिनित्यत्वमाश्रयविशेषेऽपि वह्निवत् ।।१२७।।

(आश्रयविशेषे-अपि) अनुशयिनः पुनर्जन्मप्राप्तये वृक्षादिष्वभिनिविष्टस्य जीवस्य तथा योगसिद्‌ध्या परशरीरे प्रविष्टस्य योगिनोऽनुशयिनः खल्वाश्रयविशेषे भोगमये भोगकर्ममये च भोगादिकमित्थं न सम्भवति। यतः (बुद्ध यादिनित्यत्वं न) भोगादिकं तु भवति

योगसिद्‌ध्या परशरीरे प्रविष्टस्य योगिनोऽनुशयिनः खल्वाश्रयविशेषे भोगमये भोगकर्ममये च भोगादिकमित्थं न सम्भवति] जो अनुशयी जीव पुनर्जन्म की प्राप्ति के लिए वृक्षादि में बैठा है उस जीव का और दूसरा जो योग सिद्धि वाला है जो दूसरे शरीर में बैठा है उस योगी का। आश्रय विशेष होने से भोग आदि कर्म प्राप्त नहीं होता। **[यतः (बुद्ध यादिनित्यत्वं न) भोगादिकं तु भवति बुद्‌ध्यादिभिर्बुद्‌ध्यहंकारमनोज्ञानेन्द्रियकर्मेन्द्रियैरात्मोपकरणैर्नह्येतैर्विना भोगादिकं सम्भवति]** क्योंकि भोग आदि तो बुद्धि के द्वारा होता है, बुद्धि, अहंकार मन ज्ञानेन्द्रिय हो कर्मेन्द्रिय हों । इन उपकरणों के विना भोग नहीं होता **[बुद्धयहंकारमनोज्ञानेन्द्रियकर्मेन्द्रियाणां न नित्यत्वं न ह्येतानि नित्यानि]** बुद्धि, अहंकार, मन, ज्ञानेन्द्रिय, कर्मेन्द्रिय ये नित्य नहीं हैं इनका नित्यत्व नहीं है, **नहि सर्वदाऽऽत्मना सह तथैव व्यक्तत्वेनाभिसम्बध्यन्ते व्यक्तभावेनोपकरणत्वं भजन्ते किन्त्वनभिव्यक्तरूपाणि**

[(वह्निवत्) यथा ह्यग्निराश्रयविशेषेऽप्यनभिव्यक्तः सन् न दहनादिकार्यं कर्तुं समर्थो भवति यावत् तस्य दाहकधर्मो नाभिव्यक्तो भवेत्] जैसे अग्नि आश्रय विशेष में पदार्थ विशेष में है पर अभिव्यक्त नहीं है जैसे लकड़ी में अग्नि होती है जब तक रगड़ें गे नहीं अग्नि अभिव्यक्त नहीं होगी, ऐसे ही सूक्ष्म शरीर को जब तक स्थूल शरीर से नहीं जोड़ेंगे तब तक वह कार्य नहीं करेगा (जीवात्मा को सुख दु:ख का भोग नहीं होगा) ।।१२७।।

अपरो हेतुरत्रैव - और इसी विषय में अगला हेतु देते हैं-

आश्रयासिद्धेश्च ।।१२८।।

सूत्रार्थ= वह जो वृक्षादि है वह अनुशयी जीव का आश्रय नहीं है, इसलिए उसको वहाँ भोग नहीं होगा।

[(आश्रयासिद्धेः-च) चकारो हेत्वन्तरसमुच्चयार्थः सूत्र में जो ''च'' है वह हेतु अर्थ में है । **यः खल्वनुशयिन आश्रयो वृक्षादिर्वा परदेहो वा तस्यासिद्धेरसिद्धत्वात् सदातनायानाश्रयत्वात् स्थिराश्रयत्वाभावात्, स तु खल्वाश्रयः पुनर्जन्मप्रयोजनाय यात्रामात्रमथ योगिनः परशरीरावेशश्च योगलीलामात्रं योगक्रीडाप्रदर्शनार्थं योगकौतूहलप्रदर्शनार्थम्]** जो यह अनुशयी जीव का आश्रय है वृक्षादि

बुद्धयादिभिर्बुद्धयहंकारमनोज्ञानेन्द्रियकर्मेन्द्रियैरात्मोपकरणैर्नह्येतैर्विना भोगादिकं सम्भवति बुद्धहंकारमनोज्ञानेन्द्रियकर्मेन्द्रियाणां न नित्यत्वं न ह्येतानि नित्यानि, नहि सर्वदाऽऽत्मना सह तथैव व्यक्तत्वेनाभिसम्बध्यन्ते व्यक्तभावेनोपकरणत्वं भजन्ते किन्त्वनभिव्यक्तरूपाणि (वह्निवत्) यथा ह्यग्निराश्रयविशेषेऽप्यनभिव्यक्तः सन् न दहनादिकार्यं कर्तुं समर्थो भवति यावत् तस्य दाहकधर्मो नाभिव्यक्तो भवेत् ।।१२७।।

अपरो हेतुरत्रैव -

आश्रयासिद्धेश्च ।।१२८।।

(आश्रयासिद्धेः-च) चकारो हेत्वन्तरसमुच्चयार्थः । यः खल्वनुशयिन आश्रयो वृक्षादिर्वा परदेहो वा तस्यासिद्धेरसिद्धत्वात् सदातनायानाश्रयत्वात् स्थिराश्रयत्वाभावात्, स तु खल्वाश्रयः पुनर्जन्मप्रयोजनाय यात्रामात्रमथ योगिनः परशरीरावेशश्च योगलीलामात्रं योगक्रीडाप्रदर्शनार्थं योगकौतूहलप्रदर्शनार्थम् । तथा पुनर्जन्मार्थो वृक्षाद्य आश्रयोऽसिद्धः स्वत एवोपकरणरहितः योगसिद्धये

परदेह वो जीवात्मा के भोग के लिए सिद्ध नहीं है, क्योंकि सदा के लिए वो उसका आश्रय नहीं है और स्थिर आश्रय भी नहीं है, उसका जो आश्रय है वह तो पुनर्जन्म के लिए यात्रा मात्र है। [**तथा पुनर्जन्मार्थो वृक्षाद्य आश्रयोऽसिद्धः स्वत एवोपकरणरहितः**] और पुनर्जन्म की प्राप्ति के लिए जो वृक्षादि है वो अनुशयी जीव का आश्रय तो असिद्ध ही है, वह स्वतः ही स्थूल शरीर के रहित है [**योगसिद्धये च परदेहोऽप्यसिद्धोऽशक्त उपकरणशक्तिहीनस्तादृशे देहे योगिनः प्रवेशस्य योगकौतूहलं भवति**] ।।१२८।।

अनुशयिनो योगिनः परशरीरप्रवेशो नाशंकनीयो नासम्भव इत्याह -

भूमिका परिवर्तन किया है-

योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलपनीयाः ।।१२९।।

सूत्रार्थ= खंडन करने योग्य नहीं हैं, यम नियमों से होने वाली सिद्धियाँ । जैसे जन्म औषधि आदि सिद्धियों से लाभ होता है।

[**(योगसिद्धयः-अपि न-अपलपनीयाः) योगसिद्धयः संयमसिद्धयः ''बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः'' (योग० ३.३८) परशरीरावेशादिसिद्धयोऽपि न तिरस्कार्याः**] योगदर्शन में जो सिद्धियाँ कही गयी है उनका तिरस्कार नहीं करना चाहिए [**किन्तु स्वीकार्या मन्तव्याः सन्ति**] योगदर्शन में जो यम नियमों की सिद्धियाँ बताई गयीं हैं वे सत्य हैं। [**(औषधादिसिद्धिवत्) यथा हि ''जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः'' (योग० ४.१) इति सूत्रे खल्वोषधिमन्त्र तपोजाः सिद्धयो यथा स्वीक्रियन्ते मन्यन्ते**] जैसे इस सूत्र में जन्म औषधि तपस्या आदि-आदि से जो सिद्धियाँ स्वीकार की

च परदेहोऽप्यसिद्धोऽशक्त उपकरणशक्तिहीनस्तादृशे देहे योगिनः प्रवेशस्य योगकौतूहलं भवति ।।१२८।।

अनुशयिनो योगिनः परशरीरप्रवेशो नाशंकनीयो नासम्भव इत्याह -

योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलपनीयाः ।।१२९।।

(योगसिद्धयः-अपि न-अपलपनीयाः) योगसिद्धयः संयमसिद्धयः ''बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः'' (योग०३.३८) परशरीरावेशादिसिद्धयोऽपि न तिरस्कार्याः किन्तु स्वीकार्या मन्तव्याः सन्ति (औषधादिसिद्धिवत्) यथा हि ''जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः'' (योग० ४.१) इति सूत्रे खल्वोषधिमन्त्र तपोजाः सिद्धयो यथा स्वीक्रियन्ते मन्यन्ते तथैव समाधिसिद्धेरपि सूत्रे प्रतिपादनाद्_ योगिनः परशरीरावेशादिसिद्धयोऽपि स्वीकार्या मन्तव्याः सन्ति न निषेध्याः । अत्र विज्ञानभिक्षुभाष्ये ''ईश्वराभावेऽपि योगशक्त्या सृष्टिकर्तृत्वसम्भवोऽस्ति'' इति कथनमनर्गलमेव, सृष्टावेव योगिसम्भवः पुनस्तद्द्वारा सृष्टिरचनं प्रलापमात्रं न च योगसूत्रेषु क्वचिदप्येतदुपलभ्यते ।।१२९।।

गयी हैं, वे ठीक हैं **[तथैव समाधिसिद्धेरपि सूत्रे प्रतिपादनाद् योगिनः परशरीरावेशादिसिद्धयोऽपि स्वीकार्या मन्तव्याः सन्ति न निषेध्याः]** वैसे ही योगदर्शन में जो यम नियमों की सिद्धियाँ है वे भी स्वीकार की गयी हैं। **[अत्र विज्ञानभिक्षुभाष्ये ''ईश्वराभावेऽपि योगशक्त्या सृष्टिकर्तृत्वसम्भवोऽस्ति'' इति कथनमनर्गलमेव]** यहाँ विज्ञान भिक्षु भाष्य में लिखा है, कि ''ईश्वर के न होने पर भी योग शक्ति से सृष्टि रचना आदि कार्य संभव है'', ऐसा उनका कथन ठीक नहीं है, **[सृष्टावेव योगिसम्भवः पुनस्तद्द्वारा सृष्टिरचनं प्रलापमात्रं न च योगसूत्रेषु क्वचिदप्येतदुपलभ्यते]** योगी सृष्टि की रचना कैसे कर लेगा, ''पहले सृष्टि बनेगी तब तो योगी बनेगा' ' इस प्रकार की बाते करना प्रलाप मात्र हैं, योग सूत्रों में ये बात कहीं भी उपलब्ध नहीं होती ।।१२९।।

तत्रैतेषु प्रकृतेषु देहेषु - ये जो प्रकरण में छः प्रकार के शरीर बताए थे, इन सब छः प्रकार के शरीरों में-

न भूतचैतन्यं प्रत्येकानुपलब्धेः सांहत्ये च सांहत्ये च* ।।१३०।।

सूत्रार्थ= भूतों में चेतनता नहीं है भूतों से मिलकर जो शरीर बना वह अचेतन है, क्योंकि प्रत्येक भूत का अलग अलग परीक्षण करने पर किसी में भी चेतन नहीं पाई गई, इस कारण से।

[(सांहत्ये च भूतचैतन्यं न) अथ च भूतानां सांहत्ये सति खलु ये देहा अभिनिष्पन्नास्तत्र देहेषु यच्चैतन्यं तद्_ भूतचैतन्यं भूतानां चैतन्यं नास्ति] और भूतों का संघात होने पर ये जो शरीर आदि उत्पन्न होते हैं इन देहों में जो चेतनता है वह भूतों कि चेतनता नहीं है। **[यतः (प्रत्येकानुलब्धेः) प्रत्येकस्मिन् पृथक्पृथग्भूते चैतन्यं नोपलभ्यते तस्मात्]** क्योंकि प्रत्येक भूत का परीक्षण कर लिया कहीं पर भी चेतना नहीं मिली, **[यः खलु धर्मोऽल्पोऽप्यवयवे न विद्यते स न समुदायेऽभिव्यज्यते]** किसी भी पदार्थ को इकट्ठा करने पर चेतना नहीं आई इसलिए भूत में चेतन नहीं है। **[तस्मात् तत्र देहे चैतन्यं चेतनस्यात्मन इति**

तत्रैतेषु प्रकृतेषु देहेषु -

न भूतचैतन्यं प्रत्येकानुपलब्धेः सांहत्ये च सांहत्ये च* ।।१३०।।

(सांहत्ये च भूतचैतन्यं न) अथ च भूतानां सांहत्ये सति खलु ये देहा अभिनिष्पन्नास्तत्र देहेषु यच्चैतन्यं तद् भूतचैतन्यं भूतानां चैतन्यं नास्ति । यतः (प्रत्येकानुलब्धेः) प्रत्येकस्मिन् पृथक्पृथग्भूते चैतन्यं नोपलभ्यते तस्मात्, यः खलु धर्मोऽल्पोऽप्यवयवे न विद्यते स न समुदायेऽभिव्यज्यते । तस्मात् तत्र देहे चैतन्यं चेतनस्यात्मन इति मन्तव्यम् । ''न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः'' (सांख्य०३.२०) इत्युक्तत्वादप्यत्र पुनः कथनं प्रसंगपूर्त्यर्थं तथाग्रे च ''अस्त्यात्मा...''(सांख्य० ६.१) आत्मप्रसंगोत्थापनार्थं यद् यस्य हि देहे चैतन्यं स देहादतिरिक्तो भूतेभ्योऽनभिनिष्पन्नश्चेतन आत्माऽस्तीति कृत्वा न पुनरुक्तिर्दोषावहा। सांहत्ये च सांहत्ये च द्विः कथनमध्यायपरिसमाप्त्यर्थम्।

मन्तव्यम्] इसलिए शरीर में जो चेतनता दिखाई पड़ती है वह आत्मा कि है । **[''न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः'' (सांख्य० ३.२०) इत्युक्तत्वादप्यत्र पुनः कथनं प्रसंगपूर्त्यर्थ]** यद्यपि तीसरे अध्याय में ये बात कही थी कि भूतों में चेतना नहीं है, फिर भी यहा पुनः कथन क्यों किया? प्रसंग को पूरा करने के लिए कहा। **[तथाग्रे च ''अस्त्यात्मा...'' (सांख्य० ६.१) आत्मप्रसंगोत्थापनार्थ]** आगे छटे अध्याय में सूत्र आ रहा है ''अस्ति आत्मा'' ये आत्मा का प्रसंग आ रहा है इसलिए यहाँ कह दिया शरीर में जो चेतनता है वह भूतों कि नहीं है आत्मा कि है **[यद् यस्य हि देहे चैतन्यं स देहादतिरिक्तो भूतेभ्योऽनभिनिष्पन्नश्चेतन आत्माऽस्तीति कृत्वा न पुनरुक्तिर्दोषावहा]** शरीर के भीतर जिसकी चेतनता है वह शरीर से भिन्न पदार्थ है और वह भूतों से उत्पन्न नहीं हुआ। इसलिए जो बात दुबारा कही गयी इसमें कोई दोष नहीं है। **[सांहत्ये च सांहत्ये च द्विः कथनमध्यायपरिसमाप्त्यर्थम्]** सूत्र में जो सांहत्ये च सांहत्ये च दो बार कहा गया है यह अध्याय समाप्ति का।।

